१. आकाश से तो केवल मधुर रसवाला ही पानी बरसता है किन्तु पृथ्वीपर आकर वह बीज, वृक्ष, भूमि, आदि आश्रय भेद से दाख, आम, मिर्च, कैथ आदि फलों में परिणत होकर मीठा, खट्टा, तीक्ष्ण, कषाय आदि रूप में प्रतीत होता है, उसी प्रकार सत्त्व आदि गुण भी एकरूप हैं, पर आश्रयभेद से नाना रूप धारण कर नाना प्रकार की सृष्टि का प्रादुर्भाव करते है।

पञ्चानां महाभूतानां सङ्घातो वर्तते, अस्ति पुरुषो यस्येदं भोग्यं शरीरं भोग्य-महदादिरूपं समुत्पन्नमिति । इतश्चात्माऽस्ति—त्रिगुणादिविपर्ययात् । यदुक्तं पूर्वस्यामार्यायां 'त्रिगुणमविवेकि विषय' इत्यादि । तस्माद्विपर्ययात् । यथोक्तं—'तद्विपरीतस्तथा च पुमान्' अधिष्ठानात् । यथेह लङ्घनप्लवनधावनसमर्थैरश्वैर्युक्तो रथः सारथिनाऽधिष्ठितः प्रवर्तते, तथात्माऽधिष्ठानाच्छरीरमिति । तथा चोक्तं षष्टितन्त्रे—'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' । अतोऽस्त्यात्मा,–भोक्तृभावात् यथा मधुराम्ललवणकटुतिक्तकषायषड्रसोपबृंहितस्य संयुक्तस्यान्नस्य साध्यते, एवं महदालिङ्गस्य भोक्तृत्वाऽभावादस्ति स आत्मा यस्येदं भोग्यं शरीरमिति । इतश्च, कैवल्यार्थं प्रवृत्तेश्च । केवलस्य भावः कैवल्यं, तन्निमित्तं यतः सर्वो विद्वान-विद्वांश्च संसारसन्तानक्षयमिच्छति । एवमेभिर्हेतुभिरस्त्यात्मा शरीरव्यति-रिक्तः ॥ १७ ॥

भाष्यानु०—इस प्रकार (१५–१६) इन दो आर्याओं से प्रधान के अस्तित्व की प्रतीति हो गई । इसके बाद पुरुष के अस्तित्व का प्रतिपादन करने के लिये कहते हैं—जैसा कि कहा था "व्यक्त अव्यक्त और ज्ञ (पुरुष) के ज्ञान से मोक्ष मिलता है" इनमें व्यक्त की भाँति अव्यक्त भी पाँच कारणों से सिद्ध हो गया । अब पुरुष भी तो सूक्ष्म है (दिखाई नहीं पड़ता, वह है या नहीं ? इसमें क्या प्रमाण ?) इसके अस्तित्वको अनुमान से सिद्ध करते हैं—कैसे ?—सङ्घात० यह जो महत् आदि (२४ तत्त्वों) का समूह एकत्रित है वह पुरुष के लिये ही है, ऐसा अनुमान होता है । क्योंकि वह अचेतन (जड) है, पर्यङ्क (पलंग) की तरह । (अर्थात्) जैसे पलङ्ग, विछौना, आसन, तकिया, पलंगपोस आदि (सभी जड़ हैं और इन) की परस्पर एक दूसरे के लिये कोई उपयोगिता नहीं है । ये सब एकत्र हैं । (शय्या बिछी है) इससे अनुमान होता है कि कोई पुरुष है जो इस (शय्या) पर सोएगा, जिस व्यक्ति के लिए वह शय्या है वह (शय्या से) पर = भिन्न (व्यक्ति) है । इसी प्रकार यह शरीर भी पंच महाभूतों का समूह है । कोई पुरुष अवश्य होगा जिसके भोग के लिये महदादि भोग्यतत्त्वों से यह शरीर बना है । इस कारण से भी आत्मा का अस्तित्व सिद्ध होता है—त्रिगुणादि० जैसे की पहले (११ कारिका में) कहा गया है "त्रिगुणमविवेकि विषयः" इत्यादि, इनसे भिन्न होने के कारण भी यह

सिद्ध होता है कि पुरुष है। जैसा कि कहा है—उनसे विपरीत पुरुष होता है[१]। अधि० जैसे लांघने कूदने दौड़ने आदि में समर्थ घोड़ों से युक्त रथपर जब सारथी बैठा हो तभी वह प्रवृत्त होता हैं। उसी प्रकार आत्मा से अधिष्ठित ही शरीर का भी संचालन होता है। जैसा कि षष्टितंत्र में कहा है—'पुरुष के द्वारा अधिष्ठित ही प्रधान प्रवृत्त होता है''[२] इसलिये आत्मा (पुरुष) है। भोक्तृ०—भोक्तृभाव से भी यह सिद्ध होता है कि पुरुष है जैसे मधुर, अम्ल, लवण, कटु तिक्त और कषाय इन छ रसों से परिपूर्ण अन्न का आस्वादक कोई पृथक् व्यक्ति (भोक्ता) होता है वैसे ही महदादि कार्यजात में भी भोक्तृत्व न होने से यह सिद्ध होता है कि भोक्ता कोई अवश्य है जिसका भोग्य यह शरीर है। और भी कैवल्यार्थं० केवल होना ही कैवल्य है, उस कैवल्य के लिये (शिष्ट मुमुक्षुजनों या तत्प्रतिपादक शास्त्रों की) प्रवृत्ति देखी जाती है, इससे भी अनुमान होता है कि आत्मा है, क्योंकि विद्वान् हों या मूर्ख सभी व्यक्ति संसार-सन्ताप (जन्ममरण की शृंखला) का नाश चाहते हैं।[३] इस प्रकार इन हेतुओं से यह सिद्ध होता है कि आत्मा अवश्य है और वह शरीर से पृथक् है ॥ १७ ॥

---

१. तात्पर्य यह है कि जैसे शय्या आसन आदि का एकत्रीकरण (उससे भिन्न पुरुष) के लिये होता है वैसे ही पुरुष को भी यदि त्रिगुणात्मक संघात ही माना जाय तो उसके लिये फिर किसी पर (भोक्ता) की कल्पना करनी पड़ेगी। क्योंकि जो भी संघात होगा वह पर के लिये ही होगा। इसलिये इसका जो पर होगा उसमें भी यही दोष आयेगा और अनवस्था हो जायगी। इसलिये त्रिगुणम् आदि कारिका के अनुसार इस (पुरुष) को ही पर माना जाय।

२. क्योंकि शरीरादि पदार्थ जड़ हैं। बिना चेतन के अधिष्ठान के उनका संचालन हो नहीं सकता। इससे भी यह सिद्ध होता है कि इस त्रिगुणात्मक शरीरादि का अधिष्ठाता पुरुष है।

३. मुक्ति के लिये सबकी प्रवृत्ति होती है। वह मुक्ति त्रिगुणात्मक सुख-दुःखादि पदार्थों की तो हो नहीं सकती। इसलिये मुमुक्षुजनों या तत्प्रतिपादक शास्त्रों की प्रवृत्ति के उद्देश्यभूत मुक्ति का आधार अत्रिगुण, चेतन पुरुष को ही मानना आवश्यक है।

[पुरुष वहुत हैं]

जन्म-मरण-करणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं, त्रैगुण्यविपर्ययाच्चैव ॥ १८ ॥

अन्वय--**जन्ममरणकरणानां, प्रतिनियमात्, अयुगपत्प्रवृत्तेः च, त्रैगुण्य-विपर्ययात्, च, एव, पुरुषबहुत्वं, सिद्धम् ।**

अर्थ—जन्म, मृत्यु और इन्द्रियों के प्रत्येक में भिन्न-भिन्न होने से, सबकी सब में एक साथ प्रवृत्ति न होने से, तथा त्रैगुण्य के विपर्यय से भी पुरुष का बहुत होना सिद्ध होता है ।

भाष्यम्—**अथ सः किन्नेकः सर्वशरीरेऽधिष्ठाता मणिरसनात्मकसूत्रवत्, आहो-स्विद् बहवः आत्मानः प्रतिशरीरमधिष्ठातार इति ? अत्रोच्यते--जन्म च मरणञ्च, करणानि च–जन्ममरणकरणानि, तेषां प्रतिनियमात् । प्रत्येकं नियमादित्यर्थः । यद्येक एव आत्मा स्यात्तत एकस्य जन्मनि सर्व एव जायेरन्, एकस्य मरणे सर्वेऽपि म्रियेरन्, एकस्य करणवैकल्ये बाधिर्याऽन्धत्वमूकत्वकुणित्वखञ्जत्वलक्षणे सर्वेऽपि बधिराऽन्धमूककुणिखञ्जाः स्युः, न चैवं भवति, तस्मात्–जन्ममरण-करणानां प्रतिनियमात् सिद्धम् । इतश्च,–अयुगपत् प्रवृत्तेश्च युगपत् = एककालं, न युगपद् अयुगपत् प्रवर्तनम् । यस्मादयुगपद्धर्मादिषु प्रवृत्तिर्दृश्यते एके धर्मे प्रवृत्ताः, अन्येऽधर्मे, वैराग्येऽन्ये, ज्ञानेऽन्ये प्रवृत्ताः, तस्माद् अयुगपत् प्रवृत्तेश्च-बहवः इति सिद्धम् । किञ्चान्यत्-त्रैगुण्यविपर्ययाच्चैव । त्रिगुणभाव-विपर्ययाच्च पुरुषबहुत्वं सिद्धम् । यथा सामान्ये जन्मनि एकः सात्त्विकः, सुखी, अन्यो राजसो दुःखी, अन्यस्तामसो मोहवान्, एवं त्रैगुण्यविपर्ययाद्बहुत्वं सिद्धमिति ॥ १८ ॥**

भाष्यानु०—(प्रश्न) अब वह आत्मा (पुरुष) सब शरीरों का अधिष्ठाता एक ही है ? जैसे कि एक ही तागे में सब मणियाँ गूँथ दी जाती हैं, अथवा बहुत सी आत्माएँ हैं जो प्रत्येक शरीर में पृथक्-पृथक् रहती हैं ?

(उत्तर) इस पर कहते हैं–जन्ममरण० जन्म (= उत्पन्न होना) मरण = (मृत्यु होना) और करण (= इन्द्रियां) इनके प्रतिनियम से अर्थात् प्रत्येक शरीर का जन्म, मरण और इन्द्रियों के पृथक्-पृथक् होने से । यदि आत्मा एक ही होता तो एक व्यक्ति का जन्म होने पर सब व्यक्तियों का जन्म होता और एक के मरने पर सब मर जाते, तथा एक का इन्द्रिय-वैकल्य होने से अर्थात् एक में वहरापन, अन्धापन, गूँगापन, लंगड़ापन, या खञ्जता होने पर सभी बहरे,

अन्धे, लंगड़े, गूँगे या खञ्ज हो जाते, किन्तु ऐसा होता नहीं इसलिये प्रत्येक का पृथक् जन्म-मरण और इन्द्रिय—व्यवहार का नियम होने से यह सिद्ध है कि पुरुष बहुत (प्रत्येक शरीर में भिन्न-भिन्न) होते हैं। यह भी कारण है कि अयुग० युगपत् अर्थात् एक समय में। जो युगपत् = एक ही समय में नहीं है वह अयुगपत् कहायेगा, अयुगपत् प्रवृत्ति होने से। क्योंकि धर्मादि में एक साथ सबकी प्रवृत्ति नहीं दिखाई देती। कोई धर्म में लगा है तो दूसरे अधर्म में, कोई वैराग्य में, कोई ज्ञान में प्रवृत्त हुआ रहता है। इसलिये एक साथ सबकी एकही में प्रवृत्ति न होने से भी यह सिद्ध होता है कि पुरुष बहुत (प्रत्येक शरीर में भिन्न) हैं। और क्या, त्रैगुण्य० त्रिगुण भाव का विपर्यय होने से भी पुरुषों का बहुत होना सिद्ध होता है जैसे सामान्य रूप से जन्म होनेपर भी एक सात्त्विक व्यक्ति सुखी, राजस व्यक्ति दुःखी और तामस व्यक्ति मोहवाला होता है। इस प्रकार तीनों गुणों का वैषम्य देखने से भी यह सिद्ध होता है कि प्रत्येक व्यक्ति में भिन्न आत्मा है अर्थात् पुरुष बहुत हैं॥ १

[पुरुष के धर्म]

तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य।
कैवल्यं, माध्यस्थ्यं, द्रष्टृत्वमकर्तृभावश्च॥ १९॥

अन्वय—**तस्मात्, च, विपर्यासात्, अस्य, पुरुषस्य, साक्षित्वं, माध्यस्थ्यं, द्रष्टृत्वम्, अकर्तृभावश्च, सिद्धम्॥ १९॥**

अर्थ—और उस (त्रैगुण्य) विपर्यास से इस पुरुष का साक्षी होना, मध्यस्थ होना, द्रष्टा होना और अकर्ता होना सिद्ध है।

भाष्यम्—**'अकर्ता पुरुष' इत्येतदुच्यते**—तस्माच्च विपर्यासात्। तस्माच्च = **यथोक्तत्रैगुण्यविपर्यासाद्विपर्ययात्—निर्गुणः, पुरुषो, विवेकी, भोक्तेत्यादिगुणानां पुरुषस्य यो विपर्यास उक्तस्तस्मात्, सत्त्वरजस्तमःसु कर्तृभूतेषु साक्षित्वं सिद्धं पुरुषस्येति,—योऽयमधिकृतो बहुत्वं प्रति। गुणा एव कर्तारः प्रवर्तन्ते, साक्षी न प्रवर्तते, नापि निवर्तत एव। किञ्चान्यत्,** कैवल्यं = **केवलभावः। कैवल्यम् अन्यत्वमित्यर्थः। त्रिगुणेभ्यः केवलः = अन्यः।** माध्यस्थ्यं—**मध्यस्थभावः। परिव्राजकवत् मध्यस्थः पुरुषः। यथा कश्चित् परिव्राजको ग्रामीणेषु कर्षणार्थेषु प्रवृत्तेषु केवलो मध्यस्थः, पुरुषोऽप्येवं गुणेषु प्रवर्तमानेषु न प्रवर्तते,** तस्माद्—द्रष्टृत्वमकर्तृभावश्च। **यस्मान्मध्यस्थस्तस्माद् द्रष्टा, तस्मादकर्ता**

पुरुषस्तेषां कर्मणामिति, सत्त्वरजतमांसि त्रयो गुणाः कर्मकर्तृभावेन प्रवर्तन्ते, न पुरुषः। एवं पुरुषस्याऽस्तित्वं च सिद्धम् ॥ १९ ॥

भाष्यानु०—पुरुष 'अकर्त्ता' है इसपर कहा जाता है। तस्माच्च० पूर्वोक्त त्रैगुण्यके विपर्यास से अर्थात् विपरीत होने से—पुरुष निर्गुण विवेकी भोक्ता इत्यादि गुणों से पुरुष का जो वैपरीत्य कहा है इससे। सिद्ध० सत्त्व रज तमके कर्तृभूत होनेपर पुरुष का साक्षित्व स्वयं सिद्ध है।[1] यह वही पुरुष है जो कि बहुत्व के प्रति अधिकृत है (अर्थात् जिसका बहुत होना पूर्व कारिका में सिद्ध किया गया है)। कर्त्ता जो गुण हैं वे ही प्रवृत्त हते हैं। साक्षी न तो प्रवृत्त होता है और न निवृत्त ही होता है। और क्या। कैवल्य० केवल होना, कैवल्य का अर्थ है अन्यत्व। त्रिगुणों से केवल अर्थात् (इनसे) अन्य। माध्यस्थ्यं मध्यस्थ होना। संन्यासीकी तरह पुरुष भी मध्यस्थ है। जैसे गाँवके किसान जब खेतीपातीके काममें प्रवृत्त हो जाते हैं तब उस गाँव में रहनेवाला संन्यासी केवल उनके काम को देखता रहता है क्योंकि उसके पास तो जमीन आदि है नहीं, पर है वह भी वहीं का बासी, इसी प्रकार गुण अपने-अपने कर्मों में प्रवृत्त होते हैं तो पुरुष उनको केवल देखता रहता है वह उनमें प्रवृत्त नहीं होता, इसीलिये उसमें द्रष्टृत्व—(अर्थात् देखना और कर्म न करना) है। क्योंकि वह मध्यस्थ है इसलिए वह द्रष्टा है और इसलिये उन कर्मों का अकर्त्ता भी है। सत्त्व रजस् तमस् ये तीनों गुण ही कर्मकर्त्ता रूप से प्रवृत्त होते हैं, पुरुष नहीं प्रवृत्त होता। इस प्रकार पुरुष का अस्तित्व भी सिद्ध है ॥ १९ ॥

[पुरुष के कर्तृत्व का भ्रम]

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ २० ॥

अन्वय—**तस्मात्, तत्संयोगात्, अचेतनं, चेतनावद्, इव, लिङ्गं, तथा, गुणकर्तृत्वे, च, उदासीनः, कर्त्ता, इव, भवति।**

---

१. क्योंकि पुरुष कर्त्ता हो नहीं सकता, अत्रिगुण होने से। कर्त्ता सत्त्व रजस् तमस् ये गुण ही हैं। कर्म भी वह नहीं है और उसके अस्तित्वको अस्वीकार भी नहीं किया जा सकता। वह है अवश्य, तो फिर उस पुरुष की उपयोगिता क्या हुई। इसीलिये यह स्वयं सिद्ध है कि वह इन गुणों के कर्मों का साक्षी है।

अर्थ—(जैसे लोक में घटादि शीत-उष्ण आदिके संयोग से शीतउष्ण आदि कहा जाता है ऐसे ही) यह महदादि अचेतन होनेपर भी उस चेतनके संयोग से चेतना जैसा ही प्रतीत होता है। यद्यपि गुण कर्ता है किन्तु पुरुष उदासीन होता हुआ भी कर्त्ता जैसे प्रतीत होता है।

भाष्यम्—यस्मादकर्ता पुरुषस्तत् कथमध्यवसायं करोति-'धर्मं करिष्याम्य-धर्मं न करिष्यामी'त्यतः कर्ता भवति, न च कर्ता पुरुषः, एवमुभयथा दोषः स्यादिति। अत उच्यते—इह पुरुषश्चेतनावान्; तेन चेतनाऽवभाससंयुक्तं महदादि लिङ्गं चेतनावदिव भवति। यथा लोके घटः शीतसंयुक्तः शीतः, उष्णसंयुक्त उष्णः एवं महदादि लिङ्गं तस्य संयोगात् = पुरुषसंयोगात्-चेतनावदिव भवति। तस्माद् गुणा अध्यवसायं कुर्वन्ति, न पुरुषः। यद्यपि लोके 'पुरुषः कर्ता, गन्तेत्यादि' प्रयुज्यते, तथाप्यकर्ता पुरुषः। कथम्? गुणकर्तृत्वे च तथा कर्तेव भवत्यु-दासीनः। गुणानां कर्तृत्वे सति, (तथा =) उदासीनोऽपि पुरुषः कर्तेव भवति न कर्ता। अत्र दृष्टान्तो भवति,—यथाऽचौरश्चौरैः सह गृहीतश्चौर इत्यवगम्यते, एव त्रयो गुणाः कर्तारः तैः संयुक्तः पुरुषोऽकर्ताऽपि कर्त्ता भवति, कर्तृसंयोगात्। एवं व्यक्ताऽव्यक्त-ज्ञानां विभागो विख्यातः, यद्विभागान्मोक्षप्राप्तिरिति॥ २०॥

भाष्यानु०—(प्रश्न—) जब पुरुष कर्त्ता नहीं है तो निश्चय कैसे करता है कि 'मैं धर्म करूँगा, मैं अधर्म न करूँगा' आदि। इससे तो सिद्ध होता है कि पुरुष कर्त्ता है। और वह कर्त्ता है नहीं। इस प्रकार दोनों तरहसे दोष होगा? (उत्तर-) इसलिये कहते हैं—तस्मात्तत्० यहाँ पुरुष चेतनावान् है, इसलिये चेतना के अवभास (प्रतीति) से संयुक्त महदादि कार्यसमूह चेतनावान् जैसा होता है। जैसे लोक में, घड़ा शीत से संयुक्त होने पर "घड़ा ठंढा है" और उष्णसे संयुक्त होने पर "घड़ा गरम है" ऐसा प्रयोग होता है, इसी प्रकार महदादि जड़ कार्यसमूह भी उस चेतनावान् पुरुषके संयोगसे चेतन जैसा प्रतीत होता है। इसलिये गुण ही अध्यवसाय करते हैं पुरुष नहीं। यद्यपि लोक में पुरुष करता है" "पुरुष जाता है" इत्यादि प्रयोग होते हैं फिर भी पुरुष अकर्त्ता ही है। कैसे? **गुणकर्तृत्वे०** गुणोंके कर्त्ता होनेपर उदासीन (तटस्थ) रहता हुआ भी पुरुष कर्त्ता जैसा प्रतीत होता है (वस्तुतः) कर्त्ता नहीं है। इसमें दृष्टान्त है जैसे—चोरों के

देखकर उन विषयों से विरक्त होना, बाह्य वैराग्य है। आभ्यन्तर वैराग्य—'यह प्रधान (प्रकृति) भी स्वप्न या इन्द्रजाल के सदृश है' इस प्रकार मोक्ष चाहने वाले व्यक्ति को जो स्थायी वैराग्य उत्पन्न होता है वह आभ्यन्तर वैराग्य है। ऐश्वर्य का अर्थ है ईश्वर भाव अर्थात् समर्थ होना। वह आठ प्रकार का है—अणिमा, महिमा, लघिमा, प्राप्ति, प्राकाम्य, ईशित्व, वशित्व और यत्रकामावसायित्व। अणु होना अणिमा है अर्थात् जिसमें सूक्ष्म से सूक्ष्म होकर जगत् में विचरण कर सकता है। महिमा–जिसमें महान् से महान् होकर विचरण करता है। लघिमा–विसतन्तु या रूई के फाहे से भी हलका होकर फल के परागवाही अवयवों की नोक पर भी बैठ सके। प्राप्ति—अपनी अभीष्ट वस्तु चाहे जहाँ कहीं हो उसे प्राप्त कर सके। प्राकाम्य—विस्तार से जो चाहे वही कर सके। ईशित्व—त्रिभुवन का स्वामित्व (तीनों लोकों पर अधिकार का सामर्थ्य)। वशित्व—सबको अपने वश में कर लेना। यत्रकामावसायित्व-ब्रह्म से लेकर तृणपर्यन्त में जहाँ इच्छा हो वहीं खड़ा होना, बैठना, विहार करना आदि कर सके। ये चार (धर्म, ज्ञान, वैराग्य और ऐश्वर्य) बुद्धि के सात्त्विक रूप हैं। जब सत्त्व उत्कट होकर रजस् और तमस् को अभिभूत कर देता है तब पुरुष बुद्धि के गुणों—धर्मादि को प्राप्त करता है। और क्या, तामस० इस धर्मादि से विपरीत तामस बुद्धि का रूप है। जैसे धर्म से विपरीत अधर्म, इसी प्रकार (ज्ञान से विपरीत) अज्ञान, (वैराग्य से विपरीत) अवैराग्य और (ऐश्वर्य से विपरीत) अनैश्वर्य। इस प्रकार सात्त्विक और तामस रूपों से आठ प्रकार की बुद्धि त्रिगुणात्मक अव्यक्त से उत्पन्न होती है॥ २३॥

[अहङ्कार का लक्षण और उससे सर्ग की प्रवृत्ति]

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः।
एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव॥ २४॥

अन्वय—अभिमानः, अहंकारः तस्मात्, द्विविधः, सर्गः, प्रवर्त्तते, एकादशकः, गणः, तन्मात्रः, पञ्चकश्च, एव।

अर्थ—अभिमान ही अहङ्कार है। उससे दो प्रकार की सृष्टि प्रवृत्त होती है, ग्यारह इन्द्रियों का समूह और पाँच तन्मात्राओं का समूह भी।

भाष्यम्—एवं बुद्धिलक्षणमुक्तम्। अहङ्कारलक्षणमुच्यते-एकादशकश्च-गणः = एकादशेन्द्रियाणि, तथा तन्मात्रो गणः पञ्चकः = पञ्चलक्षणोपेतः। शब्द-तन्मात्र-स्पर्शतन्मात्र-रूपतन्मात्र-गन्धतन्मात्रलक्षणोपेतः ॥ २४ ॥

भाष्यानु०—इस प्रकार बुद्धि का लक्षण कर दिया गया है अहङ्कार का लक्षण कहते हैं—अभिमानो० अभिमान ही अहङ्कार है उससे दो प्रकार की सृष्टि होती है। एकादशकश्च गणः ग्यारह इन्द्रियों का समूह और तन्मात्रः पञ्चकश्चैव तन्मात्राओं का समूह पाँच—शब्दतन्मात्र, स्पर्शतन्मात्र, रूपतन्मात्र, रसतन्मात्र, गन्धतन्मात्र इन लक्षणों वाला है ॥ २४ ॥

[द्विविधा सृष्टि]

सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ २५ ॥

अन्वय—वैकृतात्, अंकारात्, सात्त्विकः, एकादशकः, प्रवर्त्तते, भूतादेः, तन्मात्रः, स, तामसः तैजसात्, उभयम् ॥ २५ ॥

अर्थ—वैकृत अहङ्कार से सात्त्विक ग्यारह (इन्द्रिय) का समूह प्रवृत्त होता है भूतादि से (पाँच) तण्मात्राओं का, वह तामस (अहङ्कार) कहलाता है। तैजस अहङ्कार से दोनों प्रकार का सर्ग (११ इन्द्रिय और ५ तन्मात्र) प्रवृत्त होता है।

भाष्यम्—किलक्षणात्सर्गं इत्येतदाह-सत्त्वेनाभिभूते यदा रजस्तमसी अहंकारे भवतस्तदा सोऽहंकारः—सात्त्विकः। तस्य च पूर्वाचार्यैः संज्ञा कृता वैकृत इति। एस्माद्वैकृतादहङ्कारादेकादशक इन्द्रियगण उत्पद्यते। यस्मात् सात्त्विकानि विशुद्धानीन्द्रियाणि स्वविषयसमर्थानि, तस्मादुच्यते—सात्त्विक एकादशक इति। किञ्चाऽन्यत्? भूतादेस्तन्मात्रः स तामसः। तमसाभिभूते सत्त्वरजसी अहंकारे यदा भवतः, तदा सोऽहङ्कारस्तामस उच्यते, तस्य पूर्वाचार्यकृता संज्ञा 'भूतादि' तस्माद् भूतादेरहङ्कारात् तन्मात्रः पञ्चको गण उत्पद्यते। भूतानामादिभूतस्तमो-बहुलः, तेनोक्तः स तामसः। तस्माद् भूतादेः पञ्चतन्मात्रको गणः। किञ्च—तैजसादुभयम्। यदा रजसाभिभूते सत्त्वतमसी अहङ्कारे भवतस्तदा तस्मात् सोऽहङ्कारस्तैजस इति संज्ञां लभते। तस्मात्तैजसादुभयमुत्पद्यते उभयमिति। एकादशको गणस्तन्मात्रः पञ्चकः। योऽयं सात्त्विकोऽहङ्कारो, वैकृतिको = विकृतो भूत्वा, एकादशेन्द्रियाण्युत्पादयति, स तैजसमहङ्कारं सहायं गृह्णाति।

चेतन इति। तत्र बाह्येनज्ञानेन लोकपङ्क्तिर्लोकानुराग इत्यर्थः। आभ्यन्तरेण ज्ञानेन मोक्ष इत्यर्थः। वैराग्यमपि द्विविधं—बाह्यमाभ्यन्तरं च। बाह्यं दृष्टविषय-वैतृष्ण्यम्-अर्जन-रक्षण-क्षय-सङ्ग-हिंसा-दोषदर्शनाद्विरक्तस्य। आभ्यन्तरं 'प्रधान-मप्यत्र स्वप्नेन्द्रजालसदृश'मिति विरक्तस्य मोक्षेप्सोर्यदुत्पद्यते तदाभ्यन्तरं वैराग्यम्। ऐश्वर्यं = ईश्वरभावः। तच्चाष्टगुणम्—अणिमा, महिमा, लघिमा, प्राप्तिः, प्राकाम्यमीशित्वं, वशित्वं, यत्रकामावसायित्वं चेति। अणोर्भावोऽणिमा सूक्ष्मो भूत्वा जगति विचरतीति। महिमा-महान् भूत्वा विचरतीति। लघिमा—मृणाली-तूलावयवादपि लघुतया पुष्पकेसराग्रेष्वपि तिष्ठति। प्राप्तिः—अभिमतं वस्तु यत्र तत्रावस्थितः प्राप्नोति। प्राकाम्यं—प्रकामतो यदेवेच्छति तदेव विदधाति। ईशित्वं-प्रभुतया त्रैलोक्यमपीष्टे। वशित्वं-सर्वं वशीभवति। यत्रकामावसायित्वं—ब्रह्मादिस्तम्बपर्यन्तं यत्र कामस्तत्रैवास्य स्वेच्छया स्थानासनविहारानाचरतीति। चत्वारि एतानि बुद्धेः सात्त्विकानि रूपाणि। यदा सत्त्वेन रजस्तमसी अभिभूते, तदा पुमान् बुद्धिगुणान् धर्मादीनाप्नोति। किञ्चान्यत्—तामसमस्माद्विपर्यस्तम्। अस्माद्धर्मादेर्विपरीतं तामसं बुद्धिरूपम्। तत्र धर्माद्विपरीतोऽधर्मः एवमज्ञानम-वैराग्यमनैश्वर्यमिति। एवं सात्त्विकैस्तामसैः स्वरूपैरष्टाङ्गा बुद्धिस्त्रिगुणादव्यक्ता-दुत्पद्यते॥ २३॥

भाष्यानु०—जैसाकि कहा है—"व्यक्त, अव्यक्त और ज्ञ (पुरुष) को जानने से मोक्ष होता है," इस पर महत् से लेकर महाभूत (आकाशादि) पर्यन्त २३ भेदोंवाले व्यक्त की व्याख्या हो गई। "भेदानां परिमाणात्" इस (१५ वीं कारिका) से अव्यक्त की भी व्याख्या हो गई। पुरुष की भी "सङ्घा-तपरार्थत्वात्—"इस (१७ वीं कारिका) से व्याख्या कर दी गयी। इस प्रकार ये २५ तत्त्व हैं। जो व्यक्ति इन २५ तत्त्वों से त्रिभुवन को व्याप्त हुआ जान लेता है उसका भाव अर्थात् अस्तित्व ही तत्त्व (व्यक्ताव्यक्तज्ञत्व अर्थात् मुक्ति) है। जैसा कि कहा है—"पचीस तत्त्वों को जाननेवाला व्यक्ति जिस किसी आश्रम में रहता हो, जटी (वानप्रस्थ), मुंडी (संन्यासी) अथवा शिखी (ब्रह्मचारी) हो वह मुक्त हो जाता है इसमें सन्देह नहीं।" वे (२५ तत्त्व) ये हैं—प्रकृति, पुरुष, महत् (बुद्धि), अहंकार, ५ तन्मात्राएँ; ११ इन्द्रियां, ५ महाभूत ये २५ तत्त्व हैं।

वहाँ कहा है–प्रकृति से महान् उत्पन्न होता है। उस महान् का क्या लक्षण है? यही कहते हैं—अध्यवसायो बुद्धिः अध्यवसाय ही बुद्धि का लक्षण है, अध्यवसान (अन्तिम कर्तव्य का निश्चय) ही अध्यवसाय है[1]। जैसे बीज में आगे वृक्ष रूप में होने वाला अंकुर निश्चित होता है। इसी प्रकार "यह घट है" "यह पट है" इस प्रकार का निश्चय प्रत्येक पदार्थ में होता है जिसके द्वारा यह निश्चय होता है वही बुद्धि है। वह बुद्धि सात्त्विक और तामस भेदों से आठ प्रकार की होती है। इसमें बुद्धि का सात्त्विक रूप चार प्रकार का होता है— धर्म, ज्ञान, वैराग्य और ऐश्वर्य। इनमें भी दया, दान, यम, नियम ये लक्षण होते हैं। इनमें यम-नियम जैसे पातञ्जल योगसूत्र में कहे गयें हैं—"अहिंसा, सत्य, अस्तेय ब्रह्मचर्य और अपरिग्रह, ये यम हैं।" "शौच, सन्तोष, तप, स्वाध्याय और ईश्वर-प्रणिधान ये नियम हैं।" ज्ञान, प्रकाश, अवगम, भान ये (बुद्धि के) पर्याय हैं। यह (ज्ञान) दो प्रकार का होता है—बाह्य और आभ्यन्तर। इनमें बाह्यज्ञान वेद-शिक्षा—कल्प—व्याकरण—निरुक्त-छन्द-ज्यौतिष नामक ६ अङ्गों सहित, पुराण, न्याय, मीमांसा, धर्म-शास्त्र आदि है। आभ्यन्तर ज्ञान प्रकृति-पुरुष का ज्ञान है, अर्थात्—यह सत्त्व, रजस्, तमस् की साम्यावस्था ही प्रकृति है, और यह सिद्ध, निर्गुण, व्यापी तथा चेतन पुरुष है—(इस प्रकार का ज्ञान आभ्यन्तर ज्ञान है)। इनमें बाह्य (वेदादि) ज्ञान से लोक पंक्ति अर्थात् लोकानुराग होता है (लोक व्यवहार चलता है) और आभ्यन्तर ज्ञान से मोक्ष होता है।

वैराग्य भी दो प्रकार का होता है। बाह्य और आभ्यन्तर। संसार के विषयों का प्रत्यक्ष होने पर उनको प्राप्त करने, प्राप्त का रक्षण करने, रक्षित-का भी क्षय हो जाने, उनके संग से उन पर आसक्ति और हिंसा आदि दोष

१—संसार के किसी भी पदार्थ का पहिले प्रत्यक्ष होता है, फिर उसके विषय में "यह ऐसा है और ऐसा नहीं है" यह ज्ञान होता है। तब "मुझे यह करना चाहिये या नहीं करना चाहिये" ऐसा संशय होता है। अन्त में "यह मुझे करना ही चाहिए या नहीं करना चाहिए" इस प्रकार की निश्चयांत्मकता होती है जिसके अनुसार व्यक्ति किसी भी कार्य को कर डालता है या छोड़ देता है, यही अन्तिम निर्णयात्मिकता बुद्धि है जिसे अध्यवसाय कहते हैं। इसी को उदाहरण से स्पष्ट किया गया है।

भाष्यम्—इदानीं सर्गविभागदर्शनार्थमाह—प्रकृतिः = प्रधानं, ब्रह्म, अव्यक्तं, बहुधानकं, मायेति पर्यायाः। अलिङ्गस्य प्रकृतेः सकाशान्महान्—उत्पद्यते। महान्, बुद्धिः, आसुरी, मतिः, ख्यातिर्ज्ञानमिति प्रज्ञापर्यायैरुत्पद्यते। तस्माच्च महतोऽहङ्कार उत्पद्यते। अहङ्कारो, भूतादिर्वैकृतस्तैजसोऽभिमान इति पर्यायाः। तस्माद्गणश्च षोडशकः। तस्मादहङ्कारात् षोडशकः—षोडशस्वरूपेण गण उत्पद्यते। स यथा—पञ्चतन्मात्राणि = शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति, 'तन्मात्र'—'सूक्ष्म'—पर्यायवाच्यानि। तत एकादशेन्द्रियाणि-श्रोत्रं, त्वक्, चक्षुः, जिह्वा, घ्राणमिति पञ्च बुद्धीन्द्रियाणि वाक्पाणिपादपायूपस्थानीति पञ्च कर्मेन्द्रियाणि। उभयात्मकमेकादशं मनश्च। एष षोडशको गणोऽहङ्कारादुत्पद्यते। किंच—पञ्चभ्यः पञ्चभूतानि। तस्मात् षोडशकाद् गणात् पञ्चभ्यस्तन्मात्रेभ्यः सकाशात् पञ्च वै महाभूतान्युत्पद्यन्ते। यदुक्तं—शब्दतन्मात्रादाकाशं, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः गन्धतन्मात्रात् पृथिवी, एवं पञ्चभ्यः परमाणुभ्यः—पञ्च महाभूतान्युत्पद्यन्ते॥ २२॥

भाष्यानु०—अब सृष्टि-क्रम का विभाग दिखाने के लिए कहते हैं—प्रकृतेर्महान् प्रकृति प्रधान, ब्रह्म, अव्यक्त, बहुधानक, माया ये पर्यायवाची शब्द हैं (अर्थात् प्रकृतिको इन शब्दों से कहा जाता है) अलिङ्ग (जो कार्य नहीं केवल कारण है) प्रकृति से महान् उत्पन्न होता है। महान्, बुद्धि, आसुरी, मति, ख्याति, ज्ञान और प्रज्ञा ये इसके पर्याय हैं। ततोऽहङ्कारः इस महान् से अहङ्कार उत्पन्न होता है, अहङ्कार, भूतादि, वैकृत, तैजस, अभिमान् ये इस (अहङ्कार-) के पर्याय हैं। तस्माद्गणश्च षोडशकः उस अहङ्कार से सोलह रूपोंवाला गण = समूह उत्पन्न होता है, वह जैसे—पाँचतन्मात्राएँ—शब्दतन्मात्र, स्पर्शतन्मात्र, रूपतन्मात्र, रसतन्मात्र, और गन्धतन्मात्र, ये तन्मात्र सूक्ष्म पर्यायवाची हैं, उनसे ग्यारह इन्द्रियाँ—श्रोत्र, त्वक्, चक्षु, जिह्वा, घ्राण ये ५ बुद्धीन्द्रियाँ, वाक्, पाणि, पाद, पायु, और उपस्थ ये ५ कर्मेन्द्रियाँ और (ज्ञान-कर्म) उभयात्मक मन यह सोलह का समूह अहङ्कार से उत्पन्न होता है। तस्मादपि० उस सोलह के समूह में भी पाँचों तन्मात्राओं से पाँच महाभूत उत्पन्न होते हैं। जैसा कि कहा है—शब्दतन्मात्रा से आकाश, स्पर्शतन्मात्रा से वायु, रूपतन्मात्रा से तेज, रसतन्मात्रा से जल और गन्धतन्मात्रा से पृथ्वी, इस

प्रकार पाँच (तन्मात्राओं के) परमाणुओं से पाँच महाभूत (आकाश, वायु, तेज, जल और पृथ्वी) उत्पन्न होते हैं ॥ २२ ॥

[बुद्धि के लक्षण और धर्म]

अध्यवसायो बुद्धिः, धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं, तामसमस्माद्विपर्यस्तम् ॥ २३ ॥

अन्वय—अध्यवसायः, बुद्धिः, धर्मो, ज्ञानं, विरागः, ऐश्वर्यं, एतत्, सात्विकं रूपम्, अस्माद्, विपर्यस्तं, तामसम् ।

अर्थ—अध्यवसाय ही बुद्धि हैं, धर्म, ज्ञान, विराग, ऐश्वर्य यह (इसका) सात्त्विक रूप है और इसके विपरीत तामस रूप हैं ।

भाष्यम्—यदुक्तं 'व्यक्ताऽव्यक्तज्ञविज्ञानान्मोक्ष' इति, तत्र महदादि भूतान्तं त्रयोविंशतिभेदं व्यक्तं व्याख्यातम् । अव्यक्तमपि 'भेदानां परिमाणात्' इत्यादिना व्याख्यातम् । पुरुषोऽपि 'सङ्घातपरार्थत्वात्' इत्यादिभिर्हेतुभिर्व्याख्यातः । एवमेतानि पञ्चविंशतितत्त्वानि, यत्तैस्त्रैलोक्यं व्याप्तं जानाति, तस्य भावोऽस्तित्वम् । यथोक्तं—

'पञ्चविंशतितत्त्वज्ञो यत्र यत्राऽऽश्रमे रतः ।
जटी, मुण्डी, शिखी वापि, मुच्यते नात्र संशयः ॥'

तानि यथा,–प्रकृतिः, पुरुषो, बुद्धिरहङ्कारः, पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्च महाभूतानि इति । एतानि पञ्चविंशतितत्त्वानि ।

तत्रोक्तं "प्रकृतेर्महानुत्पद्यते' । तस्य महतः किं लक्षणमित्येतदाह–अध्यवसायो बुद्धिलक्षणम् । अध्यवसानम्-अध्यवसायः । यथा बीजे भविष्यद्वृत्तिकोऽहङ्कारस्तद्वदध्यवसायः–'अयं घटः' 'अयं पट' इत्येवमध्यवस्यति या सा 'बुद्धि'रिति लक्ष्यते । सा च बुद्धिरष्टाङ्गिका, सात्त्विक-तामसरूपभेदात् । तत्र बुद्धेः सात्विकं रूपं चतुर्विधं भवति । धर्मो, ज्ञानं, वैराग्यमैश्वर्यं चेति । तत्र धर्मो नाम–दयादानयमनियमलक्षणः । तत्र यमाः, नियमाश्च पातञ्जलेऽभिहिताः–'अहिंसासत्याऽस्तेयब्रह्मचर्याऽपरिग्रहा यमाः' । 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' । ज्ञानं, प्रकाशोऽवगमो, भानमिति पर्यायाः । तच्च द्विविधं–बाह्यमाभ्यन्तरं चेति । तत्र बाह्यं नाम–वेदाः शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्यौतिषाख्यषडङ्गसहिताः, पुराणानि, न्यायमीमांसाधर्मशास्त्राणि चेति । आभ्यन्तरं–प्रकृतिपुरुषज्ञानम् । इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, अयं पुरुषः सिद्धो, निर्गुणो व्यापी,

साथ पकड़ा गया निर्दोष व्यक्ति भी चोर ही समझा जाता है, इसी प्रकार तीनों गुण कर्त्ता हैं उनसे संयुक्त पुरुष कर्त्ता न होने हुए भी कर्त्ता के संयोग से कर्त्ता मान लिया जाता है। इस प्रकार व्यक्त, अव्यक्त और ज्ञ (कार्य कारण और पुरुष) इनके विभाग की व्याख्या हो गई, जिस विभाग को जानने से मोक्ष प्राप्ति होती है ॥ २० ॥

[प्रकृति-पुरुष के संयोग में हेतु]

पुरुषस्य दर्शनार्थं, कैवल्यार्थं अथा प्रधानस्य।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ २१ ॥

अन्वय—पुरुषस्य, दर्शनार्थं, तथा, प्रधानस्य, कैवल्यार्थं पङ्गु-अन्धवत्, उभयोरपि, संयोगः, तत्कृतः, सर्गः ।

अर्थ—पुरुष का (प्रधान के साथ संयोग) दर्शन के लिए और प्रधान का (पुरुष के साथ संयोग) कैवल्य के लिए होता है। (इस प्रकार) लूले और अन्धे की तरह इन दोनों का संयोग होता है और इसी से सृष्टि होती है।

भाष्यम्—अथैतयोः प्रधान-पुरुषयोः किं हेतुः सङ्घातः ? उच्यते—पुरुषस्य प्रधानेन सह संयोगो दर्शनार्थम् । प्रकृतिं, महदादिकार्यंभूतपर्यन्तं पुरुषः पश्यति एतदर्थं, प्रधानस्यापि-पुरुषेण सह संयोगः कैवल्यार्थम् । स च संयोगः पङ्ग्वन्धवदुभयोरपि द्रष्टव्यः । यथा एकः पुङ्गुरेकश्चान्धः, एतौ द्वावपि गच्छन्तौ महता सामर्थ्येनाटव्यां सार्थस्य स्तेनकृतादुपप्लवात् स्वबन्धुपरित्यक्तौ दैवादितश्चेतश्च चेरतुः। स्वगत्या च तौ संयोगमुपयातौ। पुनस्तयोः स्ववचसो-विश्वस्तत्वेन संयोगो गमनार्थं दर्शनार्थं च भवति। अन्धेन पङ्गुः स्कन्धमारोपितः, एवं शरीरारूढपङ्गुदर्शितेन मार्गेणाऽन्धो याति, पङ्गुश्चाऽन्धस्कन्धारूढः। एवं प्रधाने क्रियाशक्तिरस्त्यन्धवत्, न पुरुषे दर्शनशक्तिरस्ति, पङ्गुवत् न क्रिया, प्रधाने क्रियाशक्तिरस्त्यन्धवत्, न दर्शनशक्तिः। यथा वाऽनयोः पङ्ग्वन्धयोः कृतार्थविभागो भविष्यतीप्सितस्थान-प्राप्तयोः, एवं प्रधानमपि पुरुषस्य मोक्षं कृत्वा निवर्तते, पुरुषोऽपि प्रधानं दृष्ट्वा कैवल्यं गच्छति, तयोः कृतार्थयोर्विभागो भविष्यति। किञ्चान्यत्—तत्कृतः सर्गः तेन संयोगेन कृतस्तत्कृतः, सर्गः=सृष्टिः। यथा स्त्री-पुरुषसंयोगात् सुतोत्पत्तिस्तथा प्रधानपुरुष संयोगात् सर्गस्योत्पत्तिः ॥ २१ ॥

भाष्यानु०—(प्रश्न-) अब इन दोनों—प्रकृति और पुरुष का सङ्घात (संयोग) किस कारण से होता है ? (उत्तर-) कहते हैं—पुरुषस्य०—पुरुषका

प्रधान के साथ संयोग दर्शन के लिए होता है अर्थात् प्रकृति तथा महत् से लेकर महाभूत पर्यन्त (सम्पूर्ण) कार्य जात को पुरुष देखता है इसलिये (उसका संयोग होता है)। और कैवल्यार्थं० प्रधान का भी पुरुष के साथ संयोग कैवल्य के लिये होता है। पङ्ग्वन्ध० इन दोनों का यह संयोग लंगड़े और अन्धे के संयोग के समान समझना चाहिये, जैसे एक लंगड़ा और एक अन्धा अलग-अलग बड़े जनसमूह के साथ जा रहे थे। मार्ग में चोरों के आतंक से भगदड़ मची, वे दोनों अपने साथियों से छूट गये और इधर-उधर भटकने लगे भाग्य से दोनों की भेंट हो गयी और एक दूसरे की बातों पर विश्वास करते हुए उन दोनों का संयोग गमन तथा दर्शन के लिए उपयोगी सिद्ध हुआ। अन्धे ने लूले को कन्धे पर चढ़ा लिया। अब लूला रास्ता बताता था और उसी पर अन्धा उसे ले चलता था। इस प्रकार अन्धा कन्धे पर चढ़े हुए लूले के द्वारा प्रदर्शित मार्ग से तथा लूला अन्धे के कन्धे द्वारा, अपने गन्तव्य मार्ग को पार करते थे। ऐसे ही लूले की तरह पुरुष में भी दर्शन शक्ति तो है पर क्रियाशक्ति नहीं और अन्धे की तरह प्रधान में क्रियाशक्ति तो है पर दर्शनशक्ति नहीं। अथवा जैसे ये दोनों (लूला और अन्धा) अपने गन्तव्य स्थान पर पहुँच कर अलग-अलग हो जायेंगे ऐसे ही प्रधान भी पुरुष का मोक्ष करके निवृत्त हो जाता है और पुरुष भी प्रधान को देखकर कैवल्य को प्राप्त होता है। वे दोनों (प्रधान और पुरुष) कृतार्थ होकर अलग हो जाते हैं। और क्या—तत्कृतः सर्गः उस संयोग से ही यह सर्ग = सृष्टि होती है अर्थात् जैसे स्त्री-पुरुष के संयोग से बच्चा उत्पन्न होता है ऐसे ही प्रकृति-पुरुष के संयोग से यह सृष्टि उत्पन्न होती है॥ २१॥

[सृष्टि का क्रम]

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि॥ २२॥

अन्वय—प्रकृतेः, महान्, ततः, अहङ्कारः, तस्मात्, षोडशकः, गणश्च, तस्मात्, अपि षोडशकात् पंचभ्यः पंचभूतानि (भवन्ति)।

अर्थ—प्रकृति से महान्, उससे अहङ्कार, उस (अहङ्कार) से सोलह का समूह और उस सोलह में भी ५ (तन्मात्राओं) से ५ महाभूत उत्पन्न होते हैं।

'अभिमानोऽहङ्कार' इत्यभिमानलक्षणोऽभिमानवृत्तिश्च। 'सङ्कल्पकं मन' इति लक्षणमुक्तं तेन सङ्कल्प एव मनसो वृत्तिः त्रयस्य = बुद्ध्यहङ्कारमनसां स्वालक्षण्या वृत्तिः—असामान्या या प्रागभिहिता। बुद्धीन्द्रियाणां च वृत्तिः साऽप्यसामान्यैवेति। इदानीं वृत्तिराख्यायते—सामान्यकरणवृत्तिः। सामान्येन करणानां वृत्तिः—प्राणाद्याः वायवः पञ्च। प्राणाऽपानसमानोदानव्याना इति पञ्च वायवः—सर्वेन्द्रियाणां सामान्या वृत्तिः। यतः प्राणो नाम वायुर्मुखनासिकान्तर्गोचरः, तस्य यत् स्पन्दनं कर्म तस्य त्रयोदशविधस्याऽपि सामान्या वृत्तिः सति प्राणे यस्मात् करणानामात्मलाभ इति। प्राणोऽपि पञ्जरशकुनिवत् सर्वस्य चलनं—करोतीति। प्राणनात्—'प्राण' इत्युच्यते। तथाऽपनयनादपानः। तत्र यत् स्पन्दनं तदपि सामान्यवृत्तिरिन्द्रियस्य। तथा समानो मध्यदेशवर्ती य आहारादीनां समं नयनात् समानो वायुः तत्र यत् स्पन्दनं तत्—सामान्यकरणवृत्तिः। तथा ऊर्ध्वारोहणादुत्कर्षादुन्नयनाद्वा उदानो नाभिदेशान्मस्तकान्तर्गोचरः तत्रोदाने यत् स्पन्दनं तत् सर्वेन्द्रियाणां सामान्यवृत्तिः। किञ्च शरीरव्याप्तिरभ्यन्तरविभागश्च येन क्रियतेऽसौ शरीरव्याप्याकाशवद्व्यानः। तत्र यत् स्पन्दनं तत् करणजालस्य—सामान्या वृत्तिरिति। एवमेते पञ्च वायवः—सामान्यकरणवृत्तिरिति व्याख्याताः। त्रयोदशविधस्यापि करणसामान्या वृत्तिरित्यर्थः॥ २९॥

भाष्यानु०—अब बुद्धि, अहङ्कार और मन का (व्यापार तथा लक्षण) कहे जाते हैं—स्वालक्षण्यं वृत्तिः (स्वालक्षण्य) स्व (अपना) लक्षण ही है वृत्ति (स्वभाव) जिसका, अर्थात् जिसका जो लक्षण है वहीं वृत्ति भी है जैसे अध्यवसाय ही बुद्धि का लक्षण है ऐसा (कारिका में) कहा है अतः वही (अध्यवसाय ही) बुद्धि का व्यापार भी हुआ। 'अभिमान ही अहङ्कार है' यह अहङ्कार का लक्षण कहा है अतः अभिमान ही उसका व्यापार भी हुआ। 'सङ्कल्पक' मन है ऐसा मन का लक्षण किया है इसलियें संकल्प ही मन का व्यापार हुआ। बुद्धि, अहङ्कार और मन इन तीनों की यह स्वलक्षणात्मिका वृत्ति असामान्या होती है। पहिली कारिका में ज्ञानेन्द्रियों की जो वृत्तियाँ कही हैं वे भी असामान्य ही हैं। अब सामान्य वृत्ति कही जाती है—सामान्य० सामान्य = साधारणरूप से करणों = इन्द्रियों की वृत्ति = व्यापार है। प्राणाद्याः० प्राण, अपान, समान, उदान और व्यान ये पाँच वायु हैं जो सब इन्द्रियों के समान रूप से व्यापार हैं। क्योंकि प्राणनामक वायु यद्यपि मुख और नासिका के

भीतर रहता है किन्तु उसका जो स्पन्दन रूप कर्म है वह तेरहों (मन बुद्धि अहङ्कार तथा १० इन्द्रियों) का सामान्य व्यापार है। क्योंकि प्राण होने पर ही इन तेरहों को आत्मप्राप्ति होती है। प्राण भी पिंजड़े के पक्षी की भाँति सबका संचालन करता है। प्राणन (श्वसन) करने से ही इसे प्राण कहते हैं। इसी प्रकार अपनयन (हटाने) से ही अपान कहते हैं। उसमें भी जो स्पन्दन होता है वह सभी इन्द्रियों का सामान्य व्यापार है। ऐसे ही समान (वायु) मध्यदेश में रहता है। जो आहार आदि की एकरसता को प्राप्त करता है इसीलिये उसे समान (समं नयति) वायु कहते हैं। उसमें जो स्पन्दन होता है वह भी सब इन्द्रियों का सामान्य व्यापार है। ऐसे ही ऊपर की ओर आरोहण करने से, उत्कर्ष से अथवा उन्नयन के कारण इसे उदान कहते हैं। यह नाभि प्रदेश से मस्तक के अन्दर तक रहता है। उस उदान में जो स्पन्दन होता है वह भी सब इन्द्रियों की सामान्य वृत्ति ही है। सम्पूर्ण शरीर में जो व्याप्त है और अभ्यन्तर का विभाग करता है वह शरीरान्तर्वर्ती आकाश की तरह व्यान वायु है। उसमें जो स्पन्दन होता है वह भी सब इन्द्रियों की सामान्य वृत्ति है। इस प्रकार सामान्य इन्द्रिय वृत्ति वाले पाँच वायुओं की व्याख्या हो गई अर्थात् उन वायुओं की जो तेरहों प्रकार की सामान्य वृत्ति हैं ॥ २९ ॥

[वृत्ति की क्रमिकता]

युगपच्चतुष्टयस्य तु वृत्तिः, क्रमशश्च तस्य निर्दिष्टा।
दृष्टे, तथाऽप्यदृष्टे, त्रयस्य तत्पूर्विका वृत्तिः ॥ ३० ॥

अन्वय—**दृष्टे, चतुष्टयस्य, तु, वृत्तिः, युगपत्, तस्य, क्रमशश्च, निर्दिष्टा, तथापि, अदृष्टे, तु, त्रयस्य, तत्पूर्विका, वृत्तिः।**

अर्थ—दृष्ट (पदार्थ के) विषय में चारों (मन, बुद्धि, अहंकार और एक इन्द्रिय) का एक साथ व्यापार होता है और उसका क्रमशः भी व्यापार कहा गया है, किन्तु अदृष्ट के विषय में तो तीनों (मन, बुद्धि, अहंकार) का इन्द्रिय-पूर्वक ही व्यापार होता है।

भाष्यम्—युगपच्चतुष्टयस्य। **बुद्धयहङ्कारमनसामेकैकेन्द्रियसम्बन्धे सति चतुष्टयं भवति। चतुष्टयस्य दृष्टे=प्रतिविषयाध्यवसाये युगपद्वृत्तिः। बुद्धय-हङ्कारमनश्चक्षूंषि—युगपदेककालं रूपं पश्यन्ति–'स्थाणुरय'मिति। बुद्धय-हङ्कार-मनो-जिह्वा-युगपद्रसं गृह्णन्ति। बुद्धय-हङ्कार मनो-घ्राणानि—युगपद्**

किया है, न अहङ्कार ने, न बुद्धिने, न प्रधानने, न पुरुष ने, प्रत्युत स्वभाव से ही होने वाले गुणों के परिणाम से यह होता है। (प्रश्न—) गुण तो अचेतन हैं उनसे परिणाम में प्रवृत्ति नहीं होगी। (उत्तर—) होती है। (प्रश्न—) कैसे ? (उत्तर—) आगे कहा जायगा (५७वीं कारिकामें) वछड़ेके शरीर को पुष्ट करने और उसे दढ़ाने में जैसे जड़ दूध की प्रवृत्ति होती है ऐसे पुरुष के मोक्ष के निमित्त जड़ प्रधान की प्रवृत्ति होती है। इस प्रकार अचेतन गुण ११ इन्द्रियों के होने मे प्रवृत्त होते हैं। विशेष भी उन्हीं से प्रवृत्त होता है। जैसे नेत्र उँचे प्रदेश (ललाट पर) इसलिये बने हैं कि वे सब कुछ देख सके। ऐसे ही नासिका श्रोत्र जिह्वा आदि उस-उस प्रदेश में अपने-अपने अर्थ (विषय) को ग्रहण करने के लिये हैं। इसी प्रकार कर्मेन्द्रियाँ भी यथावत् अपने-अपने स्थान पर स्थित हुई स्वभावतः गुणपरिणाम विशेष से ही अपने-अपने विषयों को ग्रहण करने में समर्थ होती हैं। (यहाँ यह शङ्का नहीं करनी चाहिए कि) इन्द्रियों के अर्थ भी अपने भिन्न अर्थों को क्यों ग्रहण नहीं करते (क्योंकि) शास्त्रान्तर में कहा है—'गुण गुणों में ही रहते हैं' गुणों के व्यापार गुणों में ही रहते हैं अर्थ तो गुणों से बाह्य होते हैं। और गुणों के कार्यरूप होते हैं। यह कहना चाहिये। प्रधान जिनका कारण होता है॥ २७॥

[इन्द्रियों की वृत्तियां]

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः।
वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दाश्च पञ्चानाम्॥ २८॥

अन्वय—रूपादिषु, पञ्चानाम्, आलोचनमात्रं, वृत्तिः, इष्यते, पञ्चानां, वचनादानविहरणोत्सर्गानन्दाश्च।

अर्थ—रूपादियों में पाँचों (ज्ञानेन्द्रियों) की आलोचना मात्र वृत्ति मानी जाती है। बोलना, लेना, बिहार करना, उत्सर्ग और आनन्द ये पाँचों (कर्मेन्द्रियों) के व्यापार हैं।

भाष्यम्—अथेन्द्रियस्य कस्य का वृत्तिरिति ?। उच्यते। 'मात्र' शब्दो विशेषार्थोऽविशेषव्यावृत्यर्थो, यथा—'भिक्षामात्रं लभ्यते' नान्यो विशेष इति। तथा चक्षू रूपमात्रे, न रसादिषु। एवं शेषाण्यपि। तद्यथा—चक्षुषो—रूपं, जिह्वाया—रसः, घ्राणस्य—गन्धः, श्रोत्रस्य—शब्दः, त्वचः—स्पर्शः। एवमेषां बुद्धीन्द्रियाणां वृत्तिः कथिता। कर्मेन्द्रियाणां वृत्तिः कथ्यते—वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम्। कर्मेन्द्रियाणामित्यर्थः। वाचो वचनं,

हस्तयोरादानं, पादयोर्विहरणं, पायोर्भुक्तस्याऽऽहारस्य, परिणतमलोत्सर्गः, उपस्थस्य-आनन्दः=सुतोपत्तिविषया वृत्तिरिति सम्बन्धः ॥ २८ ॥

भाष्यानु०—अब इन्द्रियों में किस (इन्द्रिय) की क्या वृत्ति (विशेष व्यापार) है यह करते हैं—रूपादिषु०—इत्यादि (आलोचन मात्र में) मात्र शब्द का अर्थ है विशेष। अविशेष से आवृत्ति ही इसका प्रयोजन है। जैसे "भिक्षामात्र ही मिलती है और विशेष कुछ नहीं" [यहाँ पर मात्र शब्द भिक्षा से अतिरिक्त अन्य विशेष पदार्थों का व्यावर्तक है।] इसी प्रकार चक्षु रूप मात्र में [आलोचननिर्विकल्पकज्ञान वृत्ति वाला है] रसादि में नहीं, इसी प्रकार शेष भी जैसे—चक्षु का रूप, जिह्वा का रस, घ्राणका गन्ध श्रोत्र का शब्द, त्वचा का स्पर्श (यही आलोचन व्यापार) है। इस प्रकार इन ज्ञानेन्द्रियों के व्यापार कह दिये। अब कर्मेन्द्रियों के व्यापार कहे जाते हैं—वचना० (पञ्चानाम् का अर्थ है। पाँच कर्मेन्द्रियों का) वाक् (इन्द्रिय) का बोलना, पाणिका आदान (लेना-देना), पाद का विहरण, पायुका खाये हुए आहार के परिणाम रूप मलका त्याग करना और उपस्थ का आनन्द = पुत्रोत्पत्तिविषयक व्यापार (मैथुन) यह सम्बन्ध है।[1] ॥ २८ ॥

[अन्तःकरण की वृत्ति के दो प्रकार]

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ २९ ॥

अन्वय—**स्वालक्षण्यं, त्रयस्य, वृत्तिः सा, एषा, असामान्या, भवति, प्राणाद्याः, पञ्च, वायवः, सामान्यकरणवृत्तिः।**

अर्थ—अपना-अपना लक्षण ही तीनों (मन, बुद्धि, अहङ्कार) की वृत्ति (व्यापार) भी है। और वह यह वृत्ति असाधारण होती है। प्राणादि पाँच वायु सब करणों (इन्द्रियों) की साधारण वृत्ति है।

भाष्यम्०—**अधुना बुद्ध्यहङ्कारमनसामुच्यते, —स्वलक्षणस्वभावा—स्वालक्षण्या। 'अध्यवसायो बुद्धि' रिति लक्षणमुक्तं, सैव बुद्धिवृत्तिः। तथा**

---

१. ये दशों इन्द्रियों के असाधारण व्यापार कहे हैं। ये ही व्यापार उनके लक्षण भी हैं। जैसे रूपाद्यालोचन चक्षु का व्यापार है और रूपाद्यालोचनव्यापारवत्त्व चक्षु का लक्षण भी है। इसी प्रकार स्पर्शालोचन त्वचा का व्यापार और स्पर्शाद्यालोचनव्यापारत्त्व स्पर्श का लक्षण होगा इसी प्रकार सभी इन्द्रियों के व्यापार व लक्षण समझने चाहिये।

[मनका इन्द्रियत्व और उसका लक्षण]

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च, साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ २७ ॥

अन्वय—अत्र, मनः, उभयात्मकम्, सङ्कल्पकम्, इन्द्रियञ्च, साधर्म्यात्, गुणपरिणामविशेषात्, नानात्वं, बाह्यभेदाः, च ।

अर्थ—इनमें मन उभयात्मक (ज्ञानेन्द्रियरूप और कर्मेन्द्रियरूप) है, सङ्कल्प करनेवाला भी है और समान धर्मवाला होने से इन्द्रिय भी है, गुणों के परिणाम विशेष से (सत्त्वादि के वैषम्य से उत्पन्न अदृष्टसे) इन्द्रियों में नानात्व और बाह्य अर्थों में भेद होता है ।

भाष्यम्—एवं बुद्धीन्द्रिय-कर्मेन्द्रियभेदेन दशेन्द्रियाणि व्याख्यातानि । मन एकादशकं किमात्मकं, किस्वरूपं चेति ? तदुच्यते–अत्र = इन्द्रियवर्गे मन उभयात्मकम् । बुद्धीन्द्रियेषु बुद्धिन्द्रियवत्, कर्मेन्द्रियेषु कर्मेन्द्रियवत् । कस्माद् ? । बुद्धीन्द्रियाणां प्रवृत्तिं कल्पयति, कर्मेन्द्रियाणां च, तस्मादुभयात्मकं मनः । सङ्कल्पयतीति सङ्कल्पकम् । किञ्चान्यत् इन्द्रियं च, साधर्म्यात् = समानधर्मभावात्, सात्त्विकादहङ्काराद् बुद्धीन्द्रियाणि, कर्मेन्द्रियाणि मनसा सहोत्पद्यमानानि मनसः साधर्म्यं प्रति, तस्मात् साधर्म्यान्मनोऽपीन्द्रियम् । एवमेतान्येकादशेन्द्रियाणि सात्त्विकाद्वैकृतादहङ्कारादुत्पन्नानि । तत्र मनसः का वृत्तिरिति सङ्कल्पो—वृत्तिः । बुद्धीन्द्रियाणां—शब्दादयो वृत्तयः, कर्मेन्द्रियाणां–वचनादयः ।

अथैतानीन्द्रियाणि भिन्नानि = भिन्नार्थग्राहकाणि—किमीश्वरेण, उत स्वभावेन कृतानि ? । यतः प्रधानबुद्ध्यहङ्कारा अचेतनाः पुरुषोऽप्यकर्तेति । अत्राह इह साङ्ख्यानां स्वभावो नाम कश्चित्कारणमस्ति । अत्रोच्यते–गुणपरिणामविशेषान्नानात्वं, बाह्यभेदाश्च । इमान्येकादशेन्द्रियाणि । शब्दस्पर्शरूपरसगन्धाः पञ्चानां, वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां, सङ्कल्पश्च–मनसः । एवमेते भिन्नानामेवेन्द्रियाणामर्थाः गुणपरिणाम-विशेषात् । गुणानां परिणामो गुणपरिणामस्तस्य विशेषादिन्द्रियाणां नानात्वं बाह्यार्थभेदाश्च । अथैतन्नानात्वं नेश्वरेण, नाऽहंकारेण, न बुद्ध्या, न प्रधानेन, न पुरुषेण । (किन्तु) स्वभावात् कृतगुणपरिणामेनेति । गुणानामचेतनत्वान्न प्रवर्त्तते ? प्रवर्तत एव । कथम् ? । वक्ष्यतीहैव–'वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।' एवमचेतना गुणा एकादशेन्द्रियभावेन प्रवर्तन्ते, विशेषोऽपि तत्कृत एव, येनोच्चैः प्रदेशे चक्षुरवलोकनाय स्थितं, तथा

घ्राणं, तथा श्रोत्रं, तथा जिह्वा स्वदेशे स्वार्थग्रहणाय एवं तदर्था अपि । यत उक्तं शास्त्रान्तरे—'गुणा गुणेषु वर्तन्ते' गुणानां या वृत्तिः सा गुणविषया एवेति बाह्यार्था—विज्ञेया गुणकृता एवेत्यर्थः प्रधानं यस्य कारणमिति ।। २७ ।।

भाष्यम्०—इस प्रकार बुद्धीन्द्रिय (ज्ञानेन्द्रिय) और कर्मेन्द्रिय भेद से दश इन्द्रियों की व्याख्या की गई । ग्यारहवाँ मन क्या ? और उसका लक्षण क्या है ? इस पर कहते हैं—इस इन्द्रिय समूह में मन उभयात्मक (ज्ञानेन्द्रिय रूप भी और कर्मेन्द्रिय रूप भी) है । ज्ञानेन्द्रियों में ज्ञानेन्द्रियों की तरह और कर्मेन्द्रियों में कर्मेन्द्रियों की तरह । कैसे ? ज्ञानेन्द्रियों का सा व्यवहार भी करता है और कर्मेन्द्रियों का सा व्यवहार भी, इसीलिये उभयात्मक है । वह सङ्कल्प करता है इसीलिये सङ्कल्पक है । और (इन्द्रियों के) समान धर्मवाला होने से (वह इन्द्रिय भी है) । सात्त्विक अहङ्कार से ज्ञानेन्द्रियाँ और कर्मेन्द्रियाँ मन के साथ ही उत्पन्न होती हैं । इसीलिये मन से उनकी समानधर्मता है । इसी साधर्म्य के कारण मन भी इन्द्रिय है । इस प्रकार ग्यारह इन्द्रियाँ सात्त्विक वैकृत अहङ्कार से उत्पन्न होती हैं । (प्रश्न—) इनमें मन की क्या वृत्ति (व्यवहार) है ? (उत्तर—) सङ्कल्प ही मन की वृत्ति है, जैसे कि ज्ञानेन्द्रियों की शब्दादि वृत्तियाँ हैं और कर्मेन्द्रियों की वचनादि । (प्रश्न—) अब इन इन्द्रियों को भिन्न स्वरूपवाली तथा भिन्न-भिन्न विषयों को ग्रहण करनेवाली ईश्वर ने किया ? अथवा ये स्वभाव से ही ऐसी हो गई ? क्योंकि प्रधान बुद्धि और अहङ्कार तो अचेतन (जड़) हैं । (इसलिए वे इनको ऐसा बना नहीं सकते), पुरुष भी अकर्ता है [अर्थात् पुरुष में कर्तृत्व है ही नहीं इसलिये उनके बनाने का प्रश्न ही नहीं उठता] (उत्तर—) इस प्रश्न के उत्तर में कहते हैं कि साङ्ख्यों के मत में स्वभाव नाम का कोई एक इनकी विभिन्नता में कारण माना गया है । इसी को स्पष्ट करने के लिए कहते हैं—गुण परिणाम० ये ग्यारह इन्द्रियाँ हैं । शब्द स्पर्श रूप रस गन्ध ये पाँच (ज्ञानेन्द्रियों) के, वचन आदान विहरण उत्सर्ग और आनन्द ये पाँच (कर्मेन्द्रियों) के, तथा सङ्कल्प मन का, इस प्रकार ये भिन्न-भिन्न अर्थ (विषय) हैं । गुण परिणाम के विशेष से अर्थात् गुणों का जो परिणाम (वैषम्य) वह गुणपरिणाम हुआ उसके विशेष से (सत्त्व रजस् तमस् के वैषम्य से उत्पन्न अदृष्ट से) इन्द्रियों में नानात्व और उनके बाह्य अर्थों में भेद होता है । अब यह (सिद्ध हो गया कि) नानात्व न ईश्वर ने

सात्त्विको निष्क्रियः, स तैजसयुक्त इन्द्रियोत्पत्तौ समर्थः। तथा तामसोऽहङ्कारो भूतादिसंज्ञितो निष्क्रियत्वात् तैजसेनाहङ्कारेण क्रियावता युक्तस्तन्मात्राण्युत्पादयति। तेनोक्तं—तैजसादुभयमिति। एवं तैजसेनाऽहङ्कारेणेन्द्रियाण्येकादश, पञ्च तन्मात्राणि कृतानि भवन्ति ॥ २- ॥

भाष्यानु०—किस प्रकार अहङ्कार से सृष्टि होती है ? इस पर कहते हैं—जब सत्त्व प्रबल रहता है और रजस् तमस् उससे दबे रहते हैं, तब वह सात्त्विक अहङ्कार कहलाता है। उसी को पूर्वाचार्यों ने वैकृत नाम से कहा है। उससे सात्त्विक विशुद्ध ग्यारह इन्द्रियों का प्रादुर्भाव होता है जो अपने-अपने विषयों (शब्द-स्पर्श-रूप-रसादि) को ग्रहण करने में समर्थ होती हैं। इसलिये कहा है--सात्त्विक० और भूतादे० जब तमोगुण से सात्त्विक और राजस् अहङ्कार अभिभूत रहते हैं तब वह तामस अहङ्कार कहलाता है। उसको पूर्वाचार्यों ने भूतादि नाम से कहा है। उस भूतादि अहङ्कार से ५ तन्मात्राओं का समूह उत्पन्न होता है। क्योंकि यह भूतों (आकाशादि) से आदि में होता है (तन्मात्राओं से ही आकाशादि उत्पन्न होते हैं) इसलिये इसे भूतादि, और तमोगुण प्रधान होने से तामस कहते हैं। इसी भूतादि अहङ्कार से तन्मात्राओं का समूह उत्पन्न होता है और तैजसा०—जब रजोगुण से सात्त्विक तथा तामस अहङ्कार अभिभूत रहते हैं तब वह अहङ्कार तैजस नाम से कहलाता है। उससे दोनों प्रकार का सर्ग अर्थात्—एकादश इन्द्रिय तथा ५ तन्मात्राएँ उत्पन्न होती हैं।[1] यह सात्त्विक अहंकार वैकृत होकर जब इन्द्रियों को उत्पन्न करता है तब इस तैजस अहंकार की सहायता लेता है। क्योंकि सात्त्विक तो निष्क्रिय होता है क्रिया राजस में ही होती है इसलिये वह तैजसयुक्त होने पर ही इन्द्रियों की उत्पत्ति में समर्थ होता है। इसी प्रकार भूतादिसंज्ञक तामस अहंकार भी निष्क्रिय होता है। इसलिये

१. शंका—पहिले कह चुके हैं कि सात्त्विक या वैकृत अहङ्कार से ग्यारह इन्द्रियों की उत्पत्ति होती है और तामस या भूतादि नामक अहङ्कार से पंचतन्मात्राओं की, अब कहते हैं कि तैजस अहङ्कार से इन दोनों—११ इन्द्रिय और पंच तन्मात्राओं की उत्पत्ति होती है, यह सन्देह हो जाता है कि जो सात्त्विक और तामस से उत्पन्न हो चुकीं वे ही राजस से कैसे उत्पन्न होंगी ? इसी शंकाका समाधान आगे करते हैं।

वह भी तैजस अहंकार से युक्त होकर ही तन्मात्राओं को उत्पन्न कर सकता है। इसीलिये कहा है तैजस अहङ्कार से दोनों उत्पन्न होते हैं। इस प्रकार तैजस द्वारा दोनों—११ इन्द्रियाँ और ५ तन्मात्राएँ—उत्पन्न समझी जाती हैं ॥ २५ ॥

[इन्द्रियविभाग]

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥ २६ ॥

अन्वय—**चक्षुः-श्रोत्र-घ्राण-रसन-त्वगाख्यानि, बुद्धीन्द्रियाणि, वाक्पाणि-पादपायूपस्थानि, कर्मेन्द्रियाणि, आहुः ॥ २६ ॥**

अर्थ—चक्षु, श्रोत्र, घ्राण, रसना और त्वचा नामक ५ ज्ञानेन्द्रियाँ और वाक्, पाणि, पाद, पायु, उपस्थ ये ५ कर्मेन्द्रियाँ कही जाती हैं।

भाष्यम्—'सात्त्विक एकादशक' **इत्युक्तो यो वैकृतात् सात्त्विकादहङ्कारादुत्पद्यते, तस्य का संज्ञेत्याह,—चक्षुरादीनि स्पर्शनपर्यन्तानि** बुद्धीन्द्रियाण्युच्यन्ते। **स्पृश्यतेऽनेनेति स्पर्शनं = त्वगिन्द्रियं, तद्वाची सिद्धः स्पर्शनशब्दोऽस्ति, तेनेदं पठ्यते—**स्पर्शनकानीति। **शब्दस्पर्शरूपरसगन्धान् पञ्च विषयान् बुध्यन्ते अवगच्छन्तीति—**पञ्च बुद्धीन्द्रियाणि। वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः। **कर्म कुर्वन्तीति—**कर्मेन्द्रियाणि। **तत्र वाग्वदति, हस्तौ नाना व्यापारं कुरुतः पादौ गमनाऽऽगमनं, पायुरुत्सर्गं करोति, उपस्थ आनन्दं—प्रजोत्पत्त्या ॥ २६ ॥**

भाष्यानु०—"सात्त्विक ग्यारह इन्द्रियों का समूह" ऐसा (पूर्व कारिकामें) कहा हुआ सात्त्विक ११ इन्द्रियों का समूह जो वैकृत सात्त्विक अहङ्कार से उत्पन्न होता है उन (इन्द्रियों) के क्या नाम हैं ? इस शंका पर कहते हैं बुद्धीन्द्रियाणि० चक्षु से लेकर स्पर्शन पर्यन्त (५ इन्द्रियाँ) बुद्धीन्द्रियाँ कही जाती हैं। जिससे स्पर्श किया जाता है उसे स्पर्शन कहते हैं अर्थात् त्वगिन्द्रिय। इसका वाचक होने से स्पर्शन शब्द त्वगिन्द्रिय के लिये प्रसिद्ध है। इसलिए स्पर्शनकानि यह पढ़ा गया। शब्द स्पर्श, रूप, रस, गन्ध, इन ५ विषयों का बोधन करती हैं अर्थात् उनको समझती हैं इसलिये बुद्धीन्द्रियाँ कही जाती हैं। वाक्० वाक्, पाणि, पाद, पायु, और उपस्थ ये ५ कर्मेन्द्रियाँ कही जाती हैं। इनमें वाणी बोलती है, हाथ नाना व्यापार करते हैं, पैरों से आया-जाया जाता है, पायु से मलत्याग होता है और उपस्थ से सन्तानोत्पत्तिजन्य आनन्द की प्राप्ति होती है ॥ २६ ॥

गन्धं गृह्णन्ति। तथा त्वक्श्रोत्रे अपि। किञ्च 'क्रमशश्च तस्य निर्दिष्टा'। तस्येति = चतुष्टयस्य, क्रमशश्च वृत्तिर्भवति। यथा कश्चित् पथि गच्छन् दूरादेव दृष्ट्वा 'स्थाणुरयं, पुरुषो वे'ति संशये सति, तत्रोपरूढं शकुनिं तल्लिङ्गं वा, पश्यति, ततस्तस्य मनसा सङ्कल्पिते संशये व्यवच्छेदभूता बुद्धिर्भवति—'स्थाणुरय'-मिति। अतो अहङ्कारश्च निश्चयार्थः 'स्थाणुरेवे'ति। एवं बुद्ध्यहङ्कारमनश्चक्षुषां क्रमशो वृत्तिर्दृष्टा। यथा रूपे, तथा शब्दादिष्वपि बोद्धव्या। दृष्टे = दृष्टविषये। किञ्चान्यत्? तथाऽप्यदृष्टत्रयस्य तत्पूर्विका वृत्तिः। अदृष्टे-अनागतेऽतीते च काले, बुद्ध्यहङ्कारमनसां रूपे चक्षुःपूर्विका त्रयस्य वृत्तिः। स्पर्शे—त्वक्पूर्विका। गन्धे-घ्राणपूर्विका। रसे—रसपूर्विका। शब्दे-श्रवणपूर्विका बुद्ध्यहङ्कारमनसा-मनागते = भविष्यति कालेऽतीते च तत्पूर्विका-क्रमशो वृत्तिः। वर्तमाने युगपत्, क्रमशश्चेति ॥ ३० ॥

भाष्यानु०—युगपच्च० बुद्धि अहङ्कार और मन ये जब एक इन्द्रिय से मिलते हैं तब ये चार हो जाते हैं। इन चारों की दृष्ट—अर्थात् प्रत्येक विषय का निश्चय करने में वृत्ति एक साथ होती है। (जैसे—) बुद्धि अहङ्कार मन और चक्षु इन्द्रिय एक ही समय में रूप को देखते हैं और निश्चय करते हैं कि यह स्थाणु (खूँटा) आदि है। (इसी प्रकार) बुद्धि, अहङ्का, मन और जिह्वा एक साथ रस का ग्रहण करके निश्चय करते हैं (कि यह मधुर हैं अथवा अम्लादि है)। बुद्धि, अहङ्कार, मन और घ्राण एक साथ गन्ध को गहण करते हैं। (और उसकी सुरभिता या असुरभिता का निश्चय करते हैं।) ऐसे ही बुद्धि अहङ्कार और मन के साथ त्वचा और श्रोत्र भी (अपने-अपने विषयों—स्पर्श एवं शब्द को ग्रहण करते हैं)। किन्तु क्रमशश्च० उसकी अर्थात् (बुद्धि, अहङ्कार, मन और एक इन्द्रिय रूप) चतुष्टय की क्रमशः भी वृत्ति (व्यापार) होती है। जैसे कोई मार्ग में जाता हुआ दूर से ही "यह स्थाणु है या पुरुष" ऐसा संशय होने पर उसपर बैठे पक्षी को या उसमें विद्यमान किसी चिह्न को देखता है तो उसको मन में संकल्पित संशय के प्रति व्यवच्छेद—बुद्धि हो जाती है कि यह स्थाणु है। इसके बाद निश्चयार्थक अहङ्कार का व्यापार होता है कि यह स्थाणु हों है। इस प्रकार बुद्धि, अहङ्कार, मन और चक्षु की क्रमशः वृत्ति दिखाई गई है। जैसे रूप का उदाहरण दिया ऐसे ही

शब्दादि का भी समझना चाहिये। दृष्टे का अर्थ है दृष्ट के विषय में[1]। किन्तु तथाप्य० अदृष्ट अर्थात् अतीत या अनागत काल में तो रूप में बुद्धि अहङ्कार और मन की वृत्ति चक्षुपूर्विका होती है (अर्थात् चक्षु से रूप का प्रत्यक्ष पूर्वकाल में हो चुका है अतः उसके विषय में बुद्धि अहङ्कार और मन की क्रमशः वृत्ति होगी, ऐसे ही) स्पर्श में त्वक्पूर्विका, गन्ध में घ्राणपूर्विका, रस में रसपूर्विका, शब्द में श्रवणपूर्विका बुद्धि अहङ्कार तथा मन की अनागत अर्थात् भविष्य और अतीत (भूत) काल में क्रम से तत्तत् इन्द्रियपूर्विका वृत्ति होती है और वर्तमान में एक साथ होती है ॥३०॥

[पुरुषार्थ ही इन्द्रियों की प्रवृत्ति का हेतु]

स्वां-स्वां प्रतिपद्यन्ते परस्पराऽऽकूतहेतुकां वृत्तिम् ।
पुरुषाऽर्थं एव हेतुर्न केनचित् कार्यते करणम् ॥ ३१ ॥

अन्वय—**परस्पराकूतहेतुकां, स्वां, स्वां, वृत्ति, प्रतिपद्यन्ते, (अत्र) पुरुषार्थ, एव, हेतुः, करणं, न केनचित् कार्यते ।**

अर्थ—पुरुषार्थ सिद्धि के लिये बुद्धि आदि परस्पर एक दूसरे के आकूत (प्रवृत्ति की ओर उन्मुख होना) को जानकर अपने-अपने विषय को प्राप्त होते हैं। करणों को कोई प्रवृत्त नहीं करता (वे स्वयं ही प्रवृत्त होते हैं)।

भाष्यम्—**किञ्च-स्वां-स्वामिति वीप्सा। बुद्ध्यहङ्कारमनांसि स्वां-स्वां वृत्ति परस्पराकूतहेतुकाम्। 'आकूतमादरसम्भ्रमः' इति। प्रतिपद्यन्ते = पुरुषार्थ-करणाय बुद्ध्यहङ्कारादयः। बुद्धिरहङ्काराकूतं ज्ञात्वा स्वविषयं प्रतिपद्यते। किमर्थं-मिति चेत् ? पुरुषार्थ एव हेतुः। 'पुरुषार्थः कर्त्तव्य' इत्येवमर्थं गुणानां प्रवृत्तिः। तस्मादेतानि करणानि पुरुषार्थं प्रकाशयन्ति। यद्यचेतनानीति कथं स्वयं प्रवर्तन्ते ?। न केनचित् कार्यते करणम्। पुरुषार्थ एवैकः कारयतीति वाक्यार्थः। न केनचित्-ईश्वरेण, पुरुषेण वा, कार्यते = प्रबोध्यते, करणम् ॥३१॥**

---

१. जिस पदार्थ का इन्द्रियाँ प्रत्यक्ष कर रही हैं उसके विषय में ही इन चारों की युगपद्वृत्ति कही जा सकती है।

भाष्यानु०—स्वां स्वां यह वीप्सा है। बुद्धि अहङ्कार और अपनी-अपनी वृत्ति को परस्पराकूतहेतुकां कहा है आकूत का अर्थ है आदर या संभ्रम[1]। पुरुषार्थ सिद्ध करने के लिए बुद्धि अहङ्कार आदि परस्पर एक दूसरे के आकूत को जानकर अपने-अपने विषय को प्रतिपद्यन्ते = प्राप्त करते हैं। जैसे बुद्धि अहङ्कार के आकूत को जानकर अपने विषय को प्राप्त होती है (अर्थात् अपने विषय की ओर उन्मुख होती है)। (प्रश्न) क्यों प्रवृत्ति होती है? यदि यह पूछें तो (उत्तर-) पुरुषार्थ० पुरुषार्थ करना चाहिए, इसलिये गुणों की प्रवृत्ति होती है। इसलिये ये करण (१३ बाह्य और अन्तःकरण) पुरुषार्थ को प्रकाशित करते हैं। (प्रश्न) यदि ये (करण) अचेतन हैं तो स्वयं कैसे प्रकाशित होते हैं? (उत्तर—) न केन० केवल पुरुषार्थ ही करता है यह तात्पर्य है। न केनचित् का अर्थ है ईश्वर या पुरुष करणों को प्रबुद्ध नहीं करते अपितु वे स्वयं ही प्रवृत्त होते हैं॥ ३१॥

[करणों का लक्षण और उनका कार्य]

करणं त्रयोदशविधं, तदाहरण-धारण-प्रकाशकरम्।
कार्यं च तस्य दशधाऽऽहार्यं धार्यं, प्रकाश्यञ्च॥ ३२॥

अन्वय—करणं, त्रयोदशविधं, तद्, आहरण-धारण-प्रकाशकरम्, तस्य, कार्यं, च, दशधा, आहार्यं, धार्यं, प्रकाश्यञ्च।

अर्थ—करण तेरह प्रकार का है वह आहरण धारण और प्रकाश करने वाला है, उसका कार्य दश प्रकार का है जो आहरण धारण और प्रकाश के योग्य हैं।

भाष्यम्—बुद्ध्यादि कतिविधं तदित्युच्यते-करणं त्रयोदशविधं बोद्धव्यम्। महदादित्रयं, पञ्च बुद्धीन्द्रियाणि-चक्षुरादीनि, पञ्च कर्मेन्द्रियाणि—वागादीनीति-त्रयोदशविधं करणम्। तत् किं करोतीत्येतदाह—"तदाहरण-धारणप्रकाश-करम्"। तत्राऽऽहरणं, धारणं च—कर्मेन्द्रियाणि कुर्वन्ति। प्रकाशं—बुद्धीन्द्रियाणि। कतिविधं कार्यं तस्येति? तदुच्यते—कार्यं च तस्य दशधा। तस्य = करणस्य, कार्यं = कर्त्तव्यमिति। दशधा = दशप्रकारम्, शब्दस्पर्शरूपरसगन्धाख्यं वचनादानविहरणो-

---

१. आकूत शब्द का अर्थ तो है अभिप्राय, किन्तु यहाँ बुद्धि आदि अचेतन पदार्थ एक दूसरे के अभिप्राय को समझ नहीं सकते। इसीलिये 'प्रवृत्ति की ओर उन्मुख होना' यह अर्थ लिया जायगा।

त्सर्गानन्दाख्यमेतद्दशविधं कार्यं । बुद्धीन्द्रियैः प्रकाशितं कर्मेन्द्रियाण्याहरन्ति धारयन्ति चेति ॥ ३२ ॥

भाष्यानु०—बुद्धि आदि (जो करण हैं) वे कितने प्रकार के हैं ? इस पर कहते हैं—करणं० (करण १३ प्रकार का) जानना चाहिये । महत् आदि (महत्, अहङ्कार और मन, ये ३), ५ ज्ञानेन्द्रियाँ चक्षु आदि, पाँच कर्मेन्द्रियाँ वाक् आदि, ये ही १३ प्रकार करण के हैं । वह (करण) क्या करता है ? इस प्रश्न पर कहते हैं—तदाहरण० इसमें आहरण और धारण कर्मेन्द्रियाँ करती हैं ? यह कहते हैं कार्यञ्च० उस करण का कार्य = कर्तव्य दश प्रकार का है शब्द, स्पर्श, रूप, रस, गन्ध नाम का (ज्ञानेन्द्रियों का) और वचन, आदान, विहरण, उत्सर्ग तथा आनन्द नाम का (कर्मेन्द्रियों का) यह दश प्रकार का कार्य है । ज्ञानेन्द्रियों से प्रकाशित कार्य को कर्मेन्द्रियाँ ग्रहण करती हैं और धारण करती हैं ॥ ३२ ॥

[वाह्य-आभ्यन्तर रूप से करणविभाग]

अन्तःकरणं त्रिविधं, दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ ३३ ॥

अन्वय—अन्तःकरणं, त्रिविधं, बाह्यं, दशधा, त्रयस्य, विषयाख्यं बाह्यं, साम्प्रतकालं, आभ्यान्तरं करणं, त्रिकालम् ॥ ३३ ॥

अर्थ—अतःकरण तीन प्रकार का है । वाह्यकरण दश प्रकार का है यह (१० प्रकार का वाह्यकरण) तीन प्रकार के अन्तःकरण का विषय (भोग्य) होता है । वाह्यकरण केवल वर्तमान के विषय हैं किन्तु आभ्यन्तर करण तीनों कालों के ।

भाष्यम्—किञ्च—अन्तःकरणमिति–बुद्ध्यहङ्कारमनांसि । त्रिविधं—महदादिभेदात् । दशधा बाह्यं च । बुद्धीन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, दशविधमेतत् करणं बाह्यम् । त्रयस्यान्तःकरणस्य विषयाख्यं = बुद्ध्यहङ्कार-मनसां भोग्यम् । साम्प्रतकालं । श्रोत्रं–वर्त्तमानमेव शब्दं शृणोति, नाऽतीतं न च भविष्यन्तम् । चक्षुरपि वर्त्तमानं रूपं पश्यति, नाऽतीतं, नाऽनागतम् । त्वग्वर्त्तमानं स्पर्शम्, जिह्वा वर्त्तमानं रसं । नासिका-वर्त्तमानं गन्धं नाऽतीताऽनागतं चेति । एवं कर्मेन्द्रियाणि । वाग्वर्त्तमानं शब्दमुच्चारयति, नाऽतीतं नाऽनागतम् । पाणी वर्त्तमानं घटमाददाते । नातीतमनागतं च । पादौ वर्त्तमानं पन्थानं विहरतो, नाऽतीतं, नाप्यनागतम् । पायूपस्थौ च वर्त्तमानावुत्सर्गानन्दौ कुरुतः,

भाष्यम्—सिद्धिरुच्यते। ऊहो यथा कश्चिन्नित्यमूहते—किमिह सत्यं, किं परं, किं नैःश्रेयसं, किं कृत्वा कृतार्थः स्याम्' इति चिन्तयतो ज्ञानमुत्पद्यते, 'प्रधानादन्य एव पुरुषः, इतोऽन्या बुद्धिरन्योऽहङ्कारोऽन्यानि तन्मात्राणीन्द्रियाणि, पञ्च महाभूतानी' त्येवं तत्त्वज्ञानमुत्पद्यते, येन मोक्षो भवति। एषा 'ऊहा'ख्या प्रथमा सिद्धिः। तथा शब्दज्ञानात् प्रधानपुरुषबुद्धयहङ्कारतन्मात्रेन्द्रियपञ्चमहाभूतविषयं ज्ञानं भवति, ततो मोक्ष इत्येषा शब्दाख्या सिद्धि। अध्ययनाद् = वेदादिशास्त्राध्ययनात् पञ्चविंशतितत्त्वज्ञानं प्राप्य, तेन मोक्षं यातीत्येषा तृतीया सिद्धिः। दुःखविघातत्रयम्। आध्यात्मिकाधिभौतिकाधिदैविकदुःखत्रयविघाताय गुरुं समुपगम्य तत उपदेशान्मोक्षं याति, एषा चतुर्थी सिद्धिः। एषैव दुःखत्रयभेदात्त्रिधा कल्पनीयेति षट् सिद्धयः। तथा सुहृत्प्राप्तिः। यथा कश्चित् सुहृज्ज्ञानमधिगम्य मोक्षं गच्छति एषा सप्तमी सिद्धिः। दान यथा—कश्चिद्भगवतां प्रत्याश्रयौषधित्रिदण्डकुण्डिकादीनां ग्रासाच्छादनादीनां च दानेनोपकृत्य तेभ्यो ज्ञानमवाप्य मोक्षं याति। एषाष्टमी सिद्धिः। आसामष्टानां सिद्धीनां शास्त्रान्तरे संज्ञाः कृताः—तारं, सुतारं, तारतारं, प्रमोदं, प्रमुदितं, प्रमोदमानं, रम्यकं, सदाप्रमुदितम् इति। आसां विपर्ययाद् बुद्धेर्वधा ये विपरीतास्ते असक्तौ निक्षिप्ताः, यथाऽतारमसुतारमतारतारमित्यादि द्रष्टव्यम्। अशक्तिभेदा अष्टाविंशतिरुक्तास्ते सह बुद्धिवधैरेकादशेन्द्रियवधा इति तत्र तुष्टिविपर्यया नव, सिद्धीनां विपर्यया अष्टौ, एवमेते सप्तदश बुद्धिवधाः, एतैः सहेन्द्रियवधा अष्टाविंशतिरशक्तिभेदाः पश्चात् कथिता इति विपर्ययाऽशक्तितुष्टिसिद्धीनामेवोद्देशो, निर्देशश्च कृत इति। किञ्चान्यत्? सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः। सिद्धेः पूर्वा या विपर्ययाऽशक्तितुष्टयस्ता एव सिद्धेरङ्कुशस्तद्भेदादेव त्रिविधः। यथा—हस्ती गृहीताङ्कुशेन वशो भवति, एवं विपर्ययाऽशक्तितुष्टिभिर्गृहीतो लोकोऽज्ञानमाप्नोति, तस्मादेताः परित्यज्य सिद्धिः सेव्या, सिद्धेस्तत्त्वज्ञानमुत्पद्यते, तस्मान्मोक्ष इति ॥५१॥

भाष्यानु०—अब सिद्धियाँ कही जाती हैं—ऊहः० ऊह (तर्क) जैसे—"कोई नित्य तर्क करता है कि इस संसार में क्या सत्य है? क्या असत्य है?, क्या निःश्रेयस् (मोक्ष) है? और क्या करके मैं कृतार्थ होऊँगा?" ऐसा विचार करते-करते उसे ज्ञान हो जाता है कि पुरुष प्रधान से भिन्न है, बुद्धि भी इससे भिन्न है, अहङ्कार भी इससे पृथक् है, तन्मात्राएँ और इन्द्रियाँ भी इससे भिन्न है, पंचमहाभूत भी इससे भिन्न ही हैं, इस प्रकार

उसे तत्त्वज्ञान होता जिससे मोक्ष हो जाता है।" यही ऊह नाम की प्रथम सिद्धि है[1]। तथा शब्दज्ञान से (दूसरों को दिये जाते हुए सांख्यशास्त्र के पाठ को सुनकर क्रियाकारकादिरूप पदसमुदायात्मक शब्द से) जो प्रकृति, पुरुष, बुद्धि, अहङ्कार, तन्मात्र, इन्द्रिय और पंचमहाभूत विषयक ज्ञान होता है और उससे मोक्ष होता है, यह शब्द नाम की दूसरी सिद्धि है। अध्ययन से अर्थात् गुरु-मुख से वेदादि शास्त्रों का अध्ययन करके २५ तत्त्वों का ज्ञान होने से जो मोक्ष होता है वह अध्ययन नाम की तीसरी सिद्धि है। दुःख० आध्यात्मिक, आधिभौतिक और आधिदैविक इस तीन प्रकार के दुःख का नाश करने के लिये गुरु के पास जाकर उपदेश से जो मोक्ष प्राप्ति होती है वह चौथी सिद्धि है। चूँकि दुःख तीन हैं जिनके विनाश से यह सिद्धि होती है इसलिये यह भी तीन प्रकार की मानी जाती है। पूर्वोक्त तीन सिद्धियों को मिलाकर ये ६ सिद्धियाँ हुई। सुहृत्प्राप्तिः० कोई ज्ञानी मित्र की प्राप्ति से भी तत्वज्ञान को प्राप्त कर लेता है यह सातवीं सिद्धि है। दानञ्च० कोई तत्वज्ञानियों को आश्रय औषधि, दण्डकमण्डलु, भोजनाच्छादन आदि देकर बदले में उनसे तत्त्वज्ञान प्राप्त कर मोक्ष प्राप्त करता है, यह आठवीं सिद्धि है[2]। सिद्धयोऽष्टौ० इस प्रकार इन आठ सिद्धियों के शास्त्रान्तर (योगशात्र) में ये नाम हैं—"तार, सुतार, तारतार, प्रमोद, प्रमुदित, प्रमोदमान, रम्यक तथा सदामुदित" इनके विपर्यय (वैपरीत्य) से जो बुद्धिवध होते हैं वे अशक्ति में गिने जाते हैं, जैसे—अतार, इत्यादि। अशक्ति के २८ भेद जो कहे हैं वे इन १७ बुद्धिवधों के साथ ११ इन्द्रिय वधों को मिलाकर ही होते हैं, जिसमें ९ तुष्टियों के विपरीत ८ सिद्धियों के विपरीत ये १७ बुद्धिवध और इनके साथ ११ इन्द्रियवध पहिले कहे जा चुके हैं। इस प्रकार विपर्यय, अशक्ति, तुष्टि और सिद्धि इनका उद्देश्य और निर्देश (अर्थात्

---

१. अर्थात् बिना किसी उपदेशादि के पूर्व जन्मान्तरों के अभ्यासबल से स्वयं विचार सामर्थ्य रूप सिद्धि को ऊह कहते हैं।

२. तत्त्वकौमुदीकार श्रीवाचस्पति मिश्र ने कारण-कार्य-भाव के अनुसार पहिले अक्षरज्ञानरूप अध्ययनसिद्धि, फिर उससे होने वाली अर्थज्ञानरूप शब्दसिद्धि, तथा उसके अनन्तर विचारात्मिका ऊहशक्ति को रखा है। जिसमें पहिली दो को श्रवण तथा ऊह को मनन कहा है। तब इनके बाद गुरु ज्ञानी मित्र की प्राप्ति और अन्त में विवेक ज्ञान की शुद्धि रूप दान की सिद्धि कही है।

स्वरूप और लक्षण) बता दिये गये हैं। और भी सिद्धेः पूर्वो० सिद्धि से पूर्व जो विपर्यय अशक्ति और तुष्टि ये तीन कहे गये हैं वे सिद्धि के लिए अंकुश के समान हैं, चूँकि वे तीन है इसलिए यह अंकुश तीन प्रकार का कहा गया है। जैसे हाथी अंकुश के द्वारा वश में कर लिया जाता है, उसी प्रकार विपर्यय, अशक्ति और तुष्टि के द्वारा गृहीत हुआ लोक भी अज्ञान को प्राप्त करता है,[1] इसलिए इन (प्रतिबन्धकों) को छोड़कर सिद्धि प्राप्त करनी चाहिये, सिसि से तत्वज्ञान होता है और तत्त्वज्ञान से मोक्ष होता है ॥ ५१ ॥

[द्विविधसर्गप्रयोजन]

न विना भावैः, लिङ्गं, न विना लिङ्गेन भावनिर्वृत्तिः।
लिङ्गाख्यो, भावाख्यस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ॥५२॥

अन्वय—**बिना, भावैः, लिङ्ग न, विना लिङ्गेन, भावनिर्वृत्तिः, न, तस्मात्, लिङ्गाख्यः, भावाख्यः, (च) द्विविधः, सर्गः; प्रवर्तते।**

अर्थ—विना भावों (प्रत्यय सर्गों) के लिङ्ग (तन्मात्र सर्ग) नहीं होता और विना लिङ्ग (तमात्रसर्ग) के भावनिर्वृत्ति (प्रत्यय सर्ग की स्थिति) नहीं होगी। अतः लिङ्ग नामक तथा भाव नामक दो प्रकार से सर्ग (सृष्टि) चलता है ॥ ५२ ॥

भाष्यम्—**अथ यदुक्तं** 'भावैरधिवासितं लिङ्गं' **तत्र भावा धर्मादयोऽष्टा-वुक्ता बुद्धिपरिणामाः,-विपर्ययातुष्टिसिद्धिपरिणताः, स भावाख्यः--प्रत्ययसर्गो,** लिङ्गश्च **तन्मात्रसर्गश्चतुर्दशभूतपर्यन्त उक्तः, तत्रैकेनैव सर्गेण पुरुषार्थसिद्धौ** किमुभयविधसर्गेणेत्यत आह-भावैः = प्रत्ययसर्गैविना लिङ्गं न = **तन्मात्रसर्गो** न, पूर्वपूर्वसंस्कारादृष्टाकारितत्वादुत्तरोत्तरदेहलम्भस्य। लिङ्गेन = **तन्मात्रसर्गेण** च—विनाभावनिर्वृत्तिर्न। **स्थूलसूक्ष्मदेह-साध्यात्वाद्धर्मादेः, अनादित्वांच्च सर्गस्य बीजाङ्कुरवदन्योन्याश्रयो न दोषाय, तत्तज्जातीयापेक्षित्वेऽपि तत्तद्व्यक्तीनां परस्परानपेक्षित्वात्।** तस्माद्भावाख्यो, लिङ्गाख्यश्च द्विबिधः प्रवर्त्तति सर्ग इति ॥ ५२ ॥

भाष्यानु०—अत्र जो ४० वीं कारिका में कहा—"भावों से लिङ्ग = सूक्ष्म शरीर उपरञ्जित रहता है" वहाँ भाव धर्माधर्मादि आठ कहे गये हैं जो बुद्धि के परिणाम हैं और विपर्यय, अशक्ति, तुष्टि, सिद्धि रूप में परिणत होते

१. अर्थात् जैसे हाथी की स्वच्छन्द गति में अंकुश प्रतिबन्धक है उसी प्रकार सिद्धि की प्राप्ति में विपर्यय, अशक्ति और तुष्टि भी प्रतिबन्धक है।

है वही भाव नामक प्रत्ययसर्ग (=बौद्धिक सृष्टि) कहा जाता है। और लिङ्गशरीर रूप तन्मात्रसर्ग चौदह भुवन पर्यन्त कहा गया है। अब यहाँ शंका होती है कि एक ही सर्ग से पुरुषार्थ-सिद्धि हो जाती, दो प्रकार का (भावसर्ग और लिङ्गसर्ग) मानने से क्या लाभ ? इस पर कहते हैं—भावैः० प्रत्ययसर्गों के बिना (अर्थात् धर्माधर्मादि सहित भोगसाधन इन्द्रिय अन्तःकरणादि के बिना) लिङ्ग न तन्मात्रसर्ग नहीं रहता। (क्योंकि पूर्व पूर्व स्थूल और सूक्ष्म शरीरों के संस्कार उत्तर-उत्तर स्थूल सूक्ष्म देह की प्राप्ति में अदृष्ट रूप से हेतु होते हैं।) लिङ्ग न तन्मात्रसर्ग के विना भावनिर्वृत्तिर्न (भाव सर्ग की स्थिति नहीं हो सकती) क्योंकि धर्माधर्मादि स्थूल और सूक्ष्म देह से ही साध्य हैं। सृष्टि के अनादि होने से बीजाङ्कुरवत् इन दोनों में अन्योन्याश्रय दोष[1] नहीं होता। क्योंकि तत्-तत् जातियो की अपेक्षा रहते हुए भी तत्तद् व्यक्तियों में परस्पर अनपेक्षिता ही रहती है। तस्मात्०—इसलिये लिङ्गात्मक और भावनात्मक (सूक्ष्म या तन्मात्रसर्ग तथा भाव या प्रत्ययसर्ग) दो प्रकार के ही सर्ग की प्रवृत्ति होती है ॥ ५२ ॥

[भौतिकसर्गनिरूपण]

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ ५३ ॥

अन्वय—**दैवः, अष्टविकल्पः, तैर्यग्योनश्च, पञ्चधा, भवति, मानुष्यश्च, एकविधः, समासतः, भौतिकः, सर्गः।**

अर्थ—दैव सर्ग आठ प्रकार का है। तिर्यक् सृष्टि पाँच प्रकार की है। मनुष्य सृष्टि एक प्रकार की है। यही संक्षेप में भौतिक सृष्टि कहलाती है ॥५३॥

भाष्यम्—**किञ्चान्यत्—तत्र** अष्टविकल्पो दैवः **दैवमष्टप्रकारं—प्राजापत्यं, सौम्यम्, ऐन्द्रं, गान्धर्वं, याक्षं,** राक्षसं, पैशाचमिति। **पशुमृगपक्षिसरीसृपस्थावराणि**

---

१. जैसे बीज पहिले हुआ या अङ्कुर ? क्योंकि बीज ही नहीं था तो अङ्कुर कहाँ से आया अङ्कुर ही नहीं था तो वृक्ष होकर बीज कैसे बना ? इस शंका का कोई समाधान नहीं हो सकता, फिर भी इसमें अन्योन्याश्रय दोष नहीं माना जाता। इसी प्रकार बुद्धि अनादि है, उसका संयोग भी अनादि है तथा संसार का प्रवाह भी अनादि और अविच्छिन्न है, इसलिए धर्मादि भाव शरीर की अपेक्षा करते हैं ? या शरीर धर्मादि भावों की अपेक्षा करता है ? यह प्रश्न ही नहीं उठता। अतः अन्योन्याश्रय दोष रहते हुए भी नहीं माना जाता।

भूतान्येवं पञ्चविधस्तैरश्चः। **मानुषयोनिरेकैव**। इति चतुर्दश १४ भूतानि ॥५३॥

भाष्यानु—और भी अष्ट० दैवसर्ग (देवयोनि) आठ प्रकार का होता है—ब्राह्म, प्राजापत्य, सौम्य, ऐन्द्र, गान्धर्व, याक्ष, राक्षस और पैशाच। तैर्यग्यो० तिर्यक्योनिवाला—पशु, मृग, पक्षी, सरीसृप और स्थावर सर्ग रूप पाँच प्रकार का होता है। मानुष्यश्चैकविधः मनुष्ययोनि एक[1] ही है। समासतो भौतिकः सर्गः संक्षेप में यही चौदह प्रकार का भौतिक (पञ्चभूतमय) सर्ग है।

[सात्त्विकादि सृष्टियाँ]

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ ५४ ॥

अन्वय—**सर्गः, ऊर्ध्वं, सत्त्वविशालः, मूलतः, तमोविशालश्च, मध्ये, रजोविशालः, ब्रह्मादिस्तम्बपर्यन्तः।**

अर्थ—सृष्टि ऊपर (देवलोक में अर्थात् दैव सर्ग) सत्त्वगुणप्रधान होता है, मूल (अधोलोक में अर्थात् तिर्यक् सृष्टि) तमोगुणप्रधान तथा मध्य में (मानुष सृष्टि) रजोगुण प्रधान होती है। यही ब्रह्मा से लेकर तृणपर्यन्त सृष्टि की स्थिति है ॥ ५४ ॥

भाष्यम्—**त्रिष्वपि लोकेषु गुणत्रयमस्ति, तत्र कस्मिन् किमधिकमित्युच्यते—** ऊर्ध्वमिति। **अष्टसु देवस्थानेषु** सत्त्वविशालः = **सत्त्वविस्तारः, सत्त्वोत्कर्ष इति। तत्रापि रजस्तमसी स्तः।** तमोविशालश्च मूलतः। **पश्वादिषु स्थावरान्तेषु सर्वः सर्गस्तमसाधिक्येन** व्याप्तः। **तत्रापि सत्त्वरजसी स्तः। मध्ये = मानुषे रज उत्कटम्। तत्रापि सत्त्वतमसी विद्येते। तस्माद् दुखःप्रायाः मनुष्याः। एवं** ब्रह्मादिस्तम्बपर्यन्तः। **ब्रह्मादिस्थावरान्तः इत्यर्थः। एवम्—अभौतिकः सर्गो = लिङ्गसर्गो, भावसर्गः।** भूतसर्गः = **देवमानुषतैर्यग्योना इति। एष प्रधानकृतः षोडशविधः ॥ ५४ ॥**

भाष्यानु०—तीनों लोक त्रिगुणात्मक हैं (किन्तु उनमें गुणों के न्यूनाधिक्य से विभिन्नता हो जाती है। (इसलिए—) किस लोक में कौन गुण अधिक है यह कहते हैं—ऊर्ध्वम् पूर्वोक्त आठों देवस्थानों में (ब्राह्म आदि योनियों में)

---

१. यद्यपि इसमें भी ब्राह्मणत्वादि अवान्तर जाति भेद हो सकते हैं किन्तु मनुष्यत्वेन एक ही माना जाता है।

सत्त्वविशालः सत्त्व गुण का विस्तार अधिक है अर्थात् उनमें सत्त्वगुण अधिक मात्रा में रहता है। यद्यपि उनमें भी रज तम रहते हैं। किन्तु न्यूनमात्रा में। तमो० पशु से लेकर स्थावर पर्यन्त (५ योनियों) में सारी सृष्टि तमोगुण से व्याप्त हैं (अर्थात् पशु, मृग, पक्षी, सरीसृप और स्थावर योनियों में तमोगुण अधिक मात्रा में रहता है।) यद्यपि उनमें भी सत्त्व और रज रहते हैं किन्तु न्यूनमात्रा में। मध्ये० मानुष लोक में रजो गुण का विस्तार अधिक होता है। यद्यपि उनमें भी सत्त्व और तम होते हैं किन्तु न्यूनमात्रा में। इसीलिये मनुष्य प्रायः दुखी रहते हैं। (क्योंकि रजोगुण परिणाम दुःख है)। इस प्रकार **ब्रह्मादि०** ब्रह्मा से लेकर तृण पर्यन्त अर्थात् दैव से लेकर स्थावर योनि पर्यन्त (सृष्टि का वर्णन हुआ)। इस प्रकार लिङ्गसर्ग (तन्मात्रसर्ग) और **भावसर्ग अभौतिक** तथा दैव, तिर्यक् एवं मानुष सर्ग भौतिक सर्ग कहलाते हैं। यही प्रकृति द्वारा उत्पन्न सोलह [५ तन्मात्र + ८ भाव + ३ योनि = १६] प्रकार की सृष्टि हैं ॥५४॥

[दुःख का कारण]

तत्र जन्ममरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याऽऽविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥ ५५ ॥

अन्वय—**तत्र, लिङ्गस्य, आविनिवृत्तेः, चेतनः, पुरुषः जरामरणकृतं, दुःखं, प्राप्नोति, तस्मात्, दुःखं, स्वभावेन, (भवति) ।**

अर्थ—उन सृष्टियों में लिङ्ग-शरीर के मोक्ष पर्यन्त चेतन पुरुष जरा और मरण जन्य दुःख को प्राप्त करता है। अतः दुःख स्वभावतः होता है ॥५५॥

भाष्यम्—तत्रेति। **तेषु देवमानुषतिर्यग्योनिषु,** जराकृतं, मरणकृतं चैव दुःखं चेतनः = **चैतन्यवान्** पुरुषः प्राप्नोति, **न प्रधानं न बुद्धिर्नाहङ्कारो, न तन्मात्राणीन्द्रियाणि, महाभूतानि च। कियन्तं कालं पुरुषो दुःखं प्राप्नोतीति, तद्विविनक्ति**—लिङ्गस्याविनिवृत्तेरिति। **यत्तन्महदादिलिङ्गशरीरेणाविश्य तत्र व्यक्तीभवति, तद्यावन्न निवर्त्तते संसारशरीरमिति, तावत् संक्षेपेण त्रिषु स्थानेषु पुरुषो जरामरणकृतं दुःखं प्राप्नोति।** लिङ्गस्याऽऽविनिवृत्तेः = **लिङ्गस्य विनिवृत्ति यावत्। लिङ्गनिवृत्तौ मोक्षो, मोक्षप्राप्तौ नास्ति दुःखमिति। तत् पुनः केन निवर्त्तते? यदा पञ्चविंशतितत्त्वज्ञानं स्यात् सत्त्वपुरुषान्यथाख्यातिलक्षणम्, 'इदं प्रधानमियं बुद्धिरयमहङ्कार इमानि पञ्चतन्मात्राण्येकादशेन्द्रियाणि, पञ्च महाभूतानि एभ्योऽन्यः पुरुषो विसदृश' इत्येवंज्ञानाल्लिङ्गनिवृत्तिस्ततो मोक्ष इति ॥ ५५ ॥**

भाष्यानु०—तत्र = उन देव, तिर्यक्, मानुष योनियों में **जरा०** जराजन्य और मरणजन्य दुःख को **चेतन०** चैतन्यवान् पुरुष प्राप्त करता है। यह दुःख न तो प्रकृति को होता है, न बुद्धि को, न अहङ्कार को, न तन्मात्राओं को, न इन्द्रियों को, न महाभूतों को। अब 'कितने समय तक वह पुरुष दुःख भोगता है' इसका विवेचन करते हैं—**लिङ्गस्या०** यह जो महदादि लिङ्ग शरीर से प्रवेश करके उस स्थूल शरीर में व्यक्त होता है वह जब तक निवृत्त नहीं हो जाता[1]। लिङ्ग की आविनिवृत्ति का अर्थ है सूक्ष्म शरीर की निवृत्ति पर्यन्त। सूक्ष्म की निवृत्ति होने पर तो मोअ हो जाता है। और मोक्ष होनेपर दुःख नहीं रह जाता। (प्रश्न—) वह सूक्ष्म शरीर कैसे निवृत्त होता है? (उत्तर) जब २५ तत्त्वों का ज्ञान हो जाता है, जिसे कि सत्त्वपुरुषान्यथाख्याति रूप कहा जाता है, तब वह निवृत्त होता है। 'यह प्रधान है, यह बुद्धि है, यह अहङ्कार है, ये ५ तन्मात्र हैं, ये ११ इन्द्रियाँ हैं, ये ५ महाभूत हैं जिनसे असदृश और अन्य यह पुरुष है' ऐसे ज्ञान से लिङ्गशरीर की निवृत्ति होती है और तब मोक्ष होता है ॥५५॥

[पुरुषार्थ प्रकृतिसर्ग]

इत्येष प्रकृतिकृतौ महदादिविशेषभूतपर्यन्तः।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः॥ ५६॥

अन्वय—**इत्येष, प्रकृतिकृतौ, महदादिविशेषभूतपर्यन्तः, प्रतिपुरुषविमोक्षार्थं, स्वार्थं, इव, परार्थः, आरम्भः।**

अर्थ—इस प्रकार यह प्रकृतिद्वारा किया गया सृष्टि का आरम्भ, जो कि महत् (बुद्धि) से लेकर पंचमहाभूत पर्यन्त है, वह प्रत्येक पुरुष का मोक्ष करने के लिये अपने कार्य की तरह दूसरे का कार्य (अर्थात् पुरुष के मोक्ष के लिये प्रकृतिद्वारा सृष्टि का आरम्भ) है ॥६५॥

भाष्यम्—प्रकृतेः किंनिमित्तश्चारम्भ इत्युच्यते—'इत्येष' परिसमाप्तौ निर्देशे च। प्रकृतिकृतौ = **प्रकृतिकरणे, प्रकृतिविक्रियायां, य आरम्भोमहदादिविशेष-भूतपर्यन्तः 'प्रकृतेर्महान्, महतोऽहंकारस्तस्मात् तन्मात्राण्येकादशेन्द्रियाणि,**

---

१. अर्थात् जब तक सूक्ष्मशरीर स्थूलशरीर में प्रवेश करता रहता है तब तक पुरुष तीनों योनियों में जरामरणजन्य दुःख भोगता रहता है। जब वह निवृत्त हो जाता है अर्थात् स्थूलशरीर में प्रवेश करना बन्द हो जाता है तब पुरुष दुःख से निवृत्त हो जाता है।

तन्मात्रेभ्यः पञ्चमहाभूतानी'त्येव, प्रतिपुरुषविमोक्षार्थं = पुरुषं प्रति देवमनुष्य-तिर्यग्भावं गतानां विमोक्षार्थमारम्भः। कथम्? स्वार्थ इव परार्थ आरम्भः। यथा कश्चित् स्वार्थं त्यक्त्वा मित्रकार्याणि करोति, एवं प्रधानम्। पुरुषोऽत्र प्रधानस्य न किञ्चित् प्रत्युपकारं करोति। स्वार्थ इव। न च स्वार्थः, परार्थं एव। अर्थः = शब्दादिविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च। 'त्रिषु लोकेषु शब्दादिविषयैः पुरुषा योजयितव्याः, अन्ते च मोक्षेणे'ति प्रधानस्य प्रवृत्तिः। तथा चोक्तम्— कुम्भवत् प्रधानं, पुरुषार्थं कृत्वा निवर्त्तते' इति ॥ ५६ ॥

भाष्यानु०—(अब प्रश्न होता है कि) प्रकृति किस प्रयोजन से इस प्रपंच को प्रारम्भ करती है ? इस पर कहते हैं—इत्येष (इस प्रकार यह)। 'इत्येष' पद परिसमाप्ति और निर्देश का सूचक है[1] प्रकृतिकृतौ = प्रकृति द्वारा की गई सर्गरूप क्रिया में जो आरम्भ है वह, महदा० प्रकृति से महान्, महान् से अहङ्कार, अहङ्कार से तन्मात्र और ११ इन्द्रियाँ, तन्मात्र से पंचमहाभूत, यह इस प्रकार का प्रपंच। प्रति० देव मनुष्य और तिर्यक्योनि में प्राप्त प्रत्येक पुरुष के मोक्ष के लिए प्रकृति यह आरम्भ करती है। कैसे ? स्वार्थइव जैसे कोई अपने कार्य को छोड़कर मित्रकार्य करने लगता है उसी प्रकार प्रकृति अपने किसी प्रयोजन की अपेक्षा न करती हुई पुरुष के मोक्ष के लिये यह सब करती है। इस उपकार के बदले पुरुष प्रकृति का कोई प्रत्युपकार नहीं करता। यहाँ स्वार्थ इव (स्वार्थ की तरह) कहा है, इसका तात्पर्य है पुरुष का मोक्ष भी प्रकृति का अपना प्रयोजन नहीं है। 'अर्थः' अर्थात् शब्दादि विषयों की उपलब्धि और गुणपुरुषान्तर की उपलब्धि। "तीनों लोकों में शब्दादि विषयों के साथ पुरुषों को मिलाना चाहिये और अन्त में उनका मोक्ष करवा देना चाहिये" यह सोचकर ही प्रकृति प्रवृत्त होती है। इसलिये कहा है—घड़े की तरह प्रधान भी पुरुषार्थ करके निवृत्त हो जाता है[2] ॥ ५६ ॥

---

१. तात्पर्य यह है कि इससे पूर्व की कारिकाओं में जो १६ प्रकार की सृष्टि का वर्णन किया गया है और उससे पुरुष को जरामरणजन्य दुःख की प्राप्ति कही गई है वह सब 'इति' पद से कहा गया है, जिससे इस प्रकारण की परिसमाप्ति सूचित होती है और 'एष' पद से आगे के प्रकरण का निर्देश किया गया है।

२. जैसे घड़ा कुएँ से पानी लाकर मनुष्यों की प्यास बुझाता है और रीता होने पर पुनः कुएँ में जाता है, इस प्रकार बार-बार पानी से भरा जाकर मनुष्यों की तृप्ति करता है किन्तु उससे उसका अपना कोई प्रयोजन सिद्ध नहीं होता, इसी

[जड़ प्रधान की प्रवृत्ति में उदाहरण]

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥ ५७॥

अन्वय—**यथा, अज्ञस्य क्षीरस्य, प्रवृत्तिः, वत्सविवृद्धिनिमित्तं, तथा प्रधानस्य, प्रवृत्तिः, पुरुषविमोक्षनिमित्तं (भवति)।**

अर्थ—जैसे जड़ होने पर भी दूध की प्रवृत्ति बछड़े के शरीर को बढ़ाने = पुष्ट करने में निमित्त होती है, ऐसे ही यद्यपि प्रधान भी जड़ है किन्तु उसकी प्रवृत्ति पुरुष के मोक्ष के लिये होती है।

भाष्यम्—अत्रोच्यते-अचेतनं प्रधानं चेतनः पुरुष इति-'मया त्रिषु लोकेषु शब्दादिभिर्विषयैः पुरुषो योज्योऽन्ते मोक्षः कर्तव्य' इति कथं चेतनवत् प्रवृत्तिः ? सत्यं। किन्त्वचेतनानामपि प्रवृत्तिर्दृष्टा, निवृत्तिश्च यस्मादित्याह। यथा तृणोदकं गवा भक्षितं क्षीरभावेन परिणम्य वत्सविवृद्धिं करोति, पुष्टे च वत्से निवर्त्तते, एवं पुरुषविमोक्षनिमित्तं प्रधानस्येति, अज्ञस्य प्रवृत्तिरिति॥ ५७॥

भाष्यानु०—इस पर प्रश्न होता है—प्रधान तो अचेतन है और पुरुष चेतन है, "मुझे तीनों लोकों में शब्दादि विषयों से पुरुष को संयुक्त करना चाहिये और अन्त में इसका मोक्ष करना चाहिये" ऐसी चेतनवत् प्रवृत्ति प्रधान की कैसे होती है ? (उत्तर—) यह ठीक है। किन्तु अचेतनों की भी प्रवृत्ति और निवृत्ति देखी जाती है। इसी को उदाहरण द्वारा स्पष्ट करते हैं—वत्सविवृद्धि० जैसे गाय का खाया हुआ घास, जल इत्यादि दूध रूप में परिणत होकर बछड़े के शरीर को पुष्ट करने लगता है और बछड़े के पुष्ट हो जाने पर स्वयं निवृत्त हो जाता है, इसी प्रकार अज्ञ (जड़) प्रधान भी पुरुष को मोक्ष के लिये प्रवृत्त होता है (और मोक्ष होने पर निवृत्त हो जाता है)॥ ५७॥

[पुरुष के मोक्ष के लिये प्रकृति की प्रवृत्ति]

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥ ५८॥

अन्वय—**यथा, लोकः, औत्सुक्यनिवृत्त्यर्थं, क्रियासु प्रवर्तते, तद्वत्, अव्यक्तं पुरुषस्य, विमोक्षार्थं, प्रवर्तते।**

प्रकार प्रकृति भी पुरुष को पहले शब्दादि विषयों से संयुक्त करती है और फिर **उसके मोक्ष का प्रयास करती है, इसमें उसका अपना कोई स्वार्थ नहीं है।**

अर्थ—जैसे लोग उत्कण्ठा की निवृत्ति के लिये कार्यों में प्रवृत्त होते हैं, ऐसे ही अव्यक्त (प्रधान) भी पुरुष के मोक्ष के लिये प्रवृत्त होता है।

भाष्यम्—**किञ्च-यथा लोक इष्टौत्सुक्ये सति तस्य** निवृत्त्यर्थं क्रियासु प्रवर्तते **गमनाऽऽगमनक्रियासु, कृतकार्यो निवर्त्तते, तथा पुरुषस्य** विमोक्षार्थं—**शब्दादिविषयोपलब्धिलक्षणं, गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधमपि पुरुषार्थं कृत्वा, प्रधानं निवर्त्तते ॥ ५८ ॥**

भाष्यानु०—और, औत्सुक्य० जैसे लोक अभीष्ट वस्तु की प्राप्ति के लिये नाना प्रकार की जाना-आना आदि क्रियाओं में प्रवृत्त होकर उस वस्तु को पाने के बाद उन क्रियाओं से निवृत्त हो जाता है तद्वत्० (उसी प्रकार पुरुष के मोक्ष के लिये प्रधान भी प्रवृत्त होता है और) शब्दादि विषयोपभोग प्राप्तिस्वरूप तथा गुणपुरुषोपलब्धिस्वरूप (अर्थात् भोग और अपवर्गरूप) द्विविधपुरुषार्थं को करके वह भी निवृत हो जाता है ॥५८॥

[प्रकृति की स्वयं निवृत्ति]

रङ्गस्य दर्शयित्वा निवर्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्तते प्रकृतिः ॥ ५९ ॥

अन्वय—**यथा, नर्तकी, रङ्गस्य, दर्शयित्वा, नृत्यात्, निवर्तते, तथा, प्रकृतिः, पुरुषस्य, आत्मानं, प्रकाश्य, निवर्तते ।**

अर्थ—जैसे नर्तकी रङ्गमञ्च पर [अपना नाच] दिखाकर नृत्यसे लौट जाती है, ऐसे ही प्रकृति भी पुरुष के समक्ष अपने को दिखाकर निवृत्त हो जाती है।

भाष्यम्—**किञ्चान्यत्,—यथा** नर्तकी **शृङ्गारादिरसैः**रतिहासाविभावैश्च **निबद्धानि गीतवादित्रनृत्यानि** रङ्गस्य दर्शयित्वा **कृतकार्या** नृत्यान्निवर्त्तते, **तथा** प्रकृतिरपि पुरुषस्यात्मानं प्रकाश्य-**बुद्ध्यहङ्कारतन्मात्रेन्द्रियमहाभूतभेदेन,** निवर्त्तते ॥ ५९ ॥

भाष्यानु०—और भी। जैसे नाचनेवाली शृङ्गारादि रसों से तथा रति-हासादि भावों से रचे हुए गीत, वाद्य और नृत्य रङ्गमञ्च में बैठे हुए सभासदों को दिखाकर अपना कार्य समाप्त समझकर, नृत्य से लौट जाती है उसी प्रकार प्रकृति भी पुरुषस्य० पुरुषको अपनेको दिखाकर अर्थात् बुद्धि, अहङ्कार, तन्मात्र, इन्द्रिय और महाभूत रूपसे अपनेको प्रकट करके लौट जाती है ॥५९॥

[प्रकृति का निःस्वार्थ साधन]

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥ ६० ॥

अन्वय—**नानाविधैः, उपायैः, उपकारिणी, गुणवती, (प्रकृतिः) अनुपकारिणः, अगुणस्य, सतः, तस्य, पुंसः, अर्थम्, अपार्थकं, चरति ।**

अर्थ—नाना प्रकार के उपायों से उपकार करती हुई त्रिगुणात्मिका यह प्रकृति कुछ भी उपकार न करनेवाले, निर्गुण, नित्य, उस पुरुष के प्रयोजन को निःस्वार्थ होकर सिद्ध करती है ।

भाष्यम्—**कथं को वाऽस्याः निवर्त्तको हेतुः ?।** तदाह—नानाविधैरुपायैः **प्रकृतिः** पुरुषस्योपकारिणी, अनुपकारिणः पुंसः । कथम् ? **देवमानुषतिर्यग्भावेन सुखदुःखमोहात्मकभावेन,–एव** नानाविधैरुपायैरात्मानं **प्रकाश्य–'अहमन्या' 'त्वमन्य' इति,** निवर्त्तते । सतो **नित्यस्य,**–तस्यार्थमपार्थकं चरति = **कुरुते । यथा कश्चित् परोपकारी सर्वस्योपकुरुते,** नाऽऽत्मनः **प्रत्युपकारमीहते, एवं प्रकृतिः पुरुषार्थं चरति = करोत्यपार्थकम् । पश्चादुक्तमात्मानं प्रकाश्य निवर्त्तते ॥६०॥**

भाष्यानु०—(प्रश्न–) **कैसे अथवा** कौन इसकी निवृत्ति में हेतु है ? इस पर कहते हैं—नानाविधै० **देव, मनुष्य,** तिर्यग्योनि **रूप** से, सुख दुःख मोह रूप से, शब्दादि विषयरूप से, इस प्रकार नानाविध उपायों से उपकारिणी यह प्रकृति अनुपकारी उस पुरुष को अपना परिचय देकर अर्थात् 'मैं (तुमसे भिन्न हूँ) तुम (मुझसे भिन्न हो)' यह बताकर निवृत्त हो जाती है । गुणवत्य० गुणवती अर्थात् त्रिगुणात्मिका यह प्रकृति, अगुण, (निर्गुण) उस पुरुष का भोगापवर्गरूप प्रयोजन सिद्ध करने के लिए प्रवृत्त रहती है । जैसे कोई परोपकारी व्यक्ति सबका उपकार करता है और बदले में किसी से कुछ नहीं चाहता, इसी प्रकार प्रकृति भी अनुपकारी पुरुष के प्रयोजन को सिद्ध कर देती है और फिर अपने स्वरूप को प्रकट करके निवृत्त हो जाती है[1] ॥६०॥

---

१. पुरुष सत्त्व, रजः तम से रहित है अतः निर्गुण है । प्रकृति त्रिगुणात्मिका है अतः उसकी प्रवृत्ति और निवृत्ति होती है । पुरुष अकर्त्ता, अभोक्ता और उदासीन है अतः उससे किसी उपकार या प्रत्युपकार की संभावना ही नहीं की जा सकती, प्रकृति उपकारिणी है इसलिये पुरुष के भोगापवर्ग के लिये वह सदा कार्य करती रहती है । इसमें उसका अपना कोई स्वार्थ नहीं है ।

[प्रकृति की सुकुमारता]

'प्रकृतेः सुकुमारतरं न किञ्चिदस्ती'ति मे मतिर्भवति।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ ६१ ॥

अन्वय—प्रकृतेः, सुकुमारतरं, किञ्चित्, न, अस्ति, इति, मे, मतिः भवति, या, दृष्टा, अस्मि, इति, पुनः, पुरुषस्य, दर्शनम्, न उपैति।

अर्थ—प्रकृति से अधिक सुकुमार कुछ नहीं है, ऐसा मैं समझता हूँ, जो कि (इस पुरुष ने एकबार) मुझे देख लिया है यह सोचकर पुनः उस पुरुष के सामने कभी नहीं जाती।

भाष्यम्—निवृत्ते च किं करोतीत्याह। लोके प्रकृतेः सुकुमारतरं न किञ्चिदस्तीत्येवं मे मतिर्भवति, येन परार्थ एव मतिरुत्पन्ना। कस्मात्?। अहमनेन पुरुषेण दृष्टास्मीत्यस्य पुंसः पुनर्दर्शनं नोपैति। पुरुषस्याऽदर्शन-मुपयातीत्यर्थः। तत्र सुकुमारतरं वर्णयति। केचिदीश्वरं कारणं ब्रुवते—

'अज्ञो जन्तुरनाशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेत् स्वर्गं, नरकमेव वा'॥

अपरे स्वभावकारणिकां ब्रुवते—

'केन शुक्लीकृता हंसा, मयूराः केन चित्रिताः। स्वभावेनैव—' इति।

अत्र साङ्ख्याचार्या आहुः—निर्गुणत्वादीश्वरस्य कथं सगुणत प्रजा जायेरन्। कथं वा पुरुषान्निर्गुणादेव? तस्मात् प्रकृतेर्युज्यते। यथा शुक्लेभ्यस्तन्तुभ्यः शुक्ल एव पटो भवति, कृष्णेभ्यः कृष्ण एव इति। एवं त्रिगुणात् प्रधानात् त्रयो लोकास्त्रिगुणाः समुत्पन्ना इति गम्यते। निर्गुण ईश्वरः, सगुणानां लोकानां तस्मादुत्पत्तिर-युक्तेति। अनेन पुरुषो व्याख्यातः। तथा—केषाञ्चित् मते कालः कारणमिति। उक्तं च—

'कालः पचति भूतानि, कालः संहरते जगत्।
कालः सुप्तेषु जागर्त्ति, कालो हि दुरतिक्रमः॥

व्यक्ताऽव्यक्तपुरुषास्त्रयः पदार्थाः, तेन कालोऽन्तर्भूतोऽस्ति। स हि व्यक्तः, सर्वकर्तृत्वात्, कालस्यापि प्रधानमेव कारणम्। स्वभावोऽप्यत्रैव लीनः। तस्मात् कालो न कारणम्। नापि स्वभाव इति। तस्मात् प्रकृतिरेव कारणं, न प्रकृतेः कारणान्तरमस्तीति। न पुनर्दर्शनमुपयाति पुरुषस्य। अतः प्रकृतेः सुकुमारतरं = सुभोग्यतरं, न किञ्चिदीश्वरादि कारणमस्तीति मे मतिर्भवति। तथा च लोके रूढम् ॥६१॥

भाष्यामु०—(पुरुष का मोक्ष कराकर) निवृत्त होने के बाद क्या करती है ? यह कहते हैं–प्रकृते:० प्रकृति से अधिक सुकुमार और कोई नहीं है, ऐसा मैं समझता हूँ। जिससे दूसरे के विषय में ऐसी बुद्धि उत्पन्न हुई है। कैसे ? या दृष्टास्मीति "मैं इस पुरुष के द्वारा देखी गई हूँ" यह सोचकर जो फिर पुरुष के सामने नहीं जाती अर्थात् फिर पुरुष के लिये वह लुप्त हो जाती है[1]। प्रकृति की सुकुमारतरता का वर्णन करते हैं—कुछ लोग ईश्वर को सृष्टि के निर्माण में कारण मानते हैं। जैसे "यह जन्तु अर्थात् जीव, अज्ञ है और अपने सुखदुःख को भोगने में स्वयं असमर्थ है। ईश्वर के द्वारा प्रेरित हुआ ही स्वर्ग या नरक में जाता है (यह स्वेच्छया कहीं नहीं जा सकता)।" दूसरे लोग जो कि स्वभाव को कारण मानते हैं—"इन हंसों को श्वेत किसने किया और मोरों को रंगविरंगा किसने किया ? यह सब स्वभाव से ही ऐसा हो जाता है, इसका कोई कर्त्ता नहीं है।" इस पर सांख्याचार्यों का कहना है कि ईश्वर तो निर्गुण है। उससे सत्त्वादि गुणवाली प्रजाओं की उत्पत्ति कैसे होगी ? (इसलिये ईश्वर कारण नहीं हो सकता) इसी प्रकार निर्गुण पुरुष से सगुण महदादि कार्यसमूह कैसे उत्पन्न होगा ? (अतः स्वभाव भी कारण नहीं)। प्रकृति से यह सब हो सकता है। जैसे सफेद तागों से सफेद ही कपड़ा बनेगा और कालेसे काला ही, इसी प्रकार त्रिगुणात्मक प्रधानसे त्रिगुणात्मक तीनों लोक उत्पन्न होते हैं। चूँकि ईश्वर निर्गुण है अतः उससे सगुण संसार कैसे उत्पन्न होगा ? इससे पुरुष की व्याख्या हो गई[2]। तथा किसीके मतमें काल (समय) ही इस जगत् का कारण है।

१. ५९वीं कारिका में बताया था कि जैसे नर्तकी सभासदों को नृत्यादि दिखाकर लौट जाती है वैसे ही प्रकृति भी पुरुष को अपने स्वरूप का परिचय कराकर निवृत्त हो जाती है यहां यह प्रश्न हो सकता है कि जैसे सभासदों को प्रसन्न करके निवृत्त हुई नर्तकी धनादि के लोभ से पुनः (रंगमंचपर) आ सकती है वैसे ही निवृत्त हुई प्रकृति भी पुनः मुक्त हुए पुरुष के लिये सर्गनिर्माण कर सकती है ? इसका समाधान इस कारिका में किया गया है—प्रकृति इतनी सुकुमार है कि वह लज्जाशील कुलवधू की तरह एकबार पुरुष के सामने आनेपर "इसने मुझे देख लिया है" यह सोचकर शर्म के मारे पुनः उसके पास नहीं जाती, सदा के लिये उससे निवृत्त हो जाती है।

२. अर्थात् प्रकृतिकारणतावाद की स्थापना करके ईश्वर और आत्म-कारणतावाद का निराकरण हो गया।

जैसे कहा है—"काल ही प्राणियों को अवस्थान्तर में परिणत करता हैं काल ही जगत् का संहार करता है। जब सब सो जाते हैं (अर्थात् प्रलय काल में) तब भी काल जागता रहता है। इसलिये काल अनुल्लङ्घनीय है।" (काल भी कारण नहीं है इसका समाधान करते हैं—) व्यक्त, अव्यक्त और पुरुष, ये तीन पदार्थ हैं। काल का भी इन्हीं में अन्तर्भाव हो जाता है। क्योंकि सबका कर्त्ता होने के कारण काल भी तो व्यक्त ही है। काल का भी कारण प्रकृति ही है। स्वभाव भी इसी में निहित हो जाता है। इसलिये न तो काल कारण हैं और न स्वभाव, प्रत्युत प्रकृति ही कारण है। प्रकृति से अतिरिक्त दूसरा कारण हो नहीं सकता। वह फिर (मुक्त करने के बाद) पुरुष के सामने नहीं आती, इसलिये प्रकृति से अधिक सुकुमार अर्थात् अत्यन्त भोग्य और कोई भी ईश्वरादि कारण नहीं है, ऐसा मेरी समझ में आता है और ऐसा ही लोक में प्रसिद्ध है ॥ ६१ ॥

[बन्ध और मोक्ष प्रकृति के होते हैं पुरुष नहीं]

तस्मान्न बध्यतेऽद्धा, न मुच्यते नापि संसरति कश्चित्।
संसरति, बध्यते, मुच्यते च नानाऽऽश्रया प्रकृतिः ॥ ६२ ॥

अन्वय—तस्मात्, अद्धा न बध्यते, न मुच्यते, नापि, कश्चित्, संसरति नानाश्रया, प्रकृतिः संसरति, बध्यते, मुच्यते च।

अर्थ—इसलिए पुरुष कभी भी न तो बंधता है, न मुक्त होता है और न कभी संसरण (जन्ममरण) करता है, विभिन्न रूपों से प्रकृति ही संसरण करती है, बँधती है और मुक्त होती है।

भाष्यम्—'पुरुषो मुक्तः' 'पुरुषः संसारी'ति नोदिते आह—तस्मात् कारणात्, पुरुषो न बध्यते, नापि मुच्यते, नापि संसरति, यस्मात् कारणात् प्रकृतिरेव नानाश्रया = दैवमानुषतिर्यग्योन्याश्रया बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूत-स्वरूपेण बध्यते, मुच्यते, संसरति चेति। अथ मुक्त एव स्वभावात् स सर्वगतश्च कथं संसरति ?। अप्राप्तप्रापणार्थं संसरणमिति तेन पुरुषो बध्यते, पुरुषो मुच्यते, पुरुष संसरतीति व्यपदिश्यते, येन संसारित्वं विद्यते। सत्त्वपुरुषान्तरज्ञानात्तत्त्वं पुरुषस्याऽभिव्यज्यते। तदभिव्यक्तौ केवलः, शुद्धः, मुक्तः, स्वरूपप्रतिष्ठ पुरुष इति। अथ यदि पुरुषस्य बन्धो नास्ति, ततो मोक्षोऽपि नास्ति ? अत्रोच्यते—प्रकृतिरेवा-त्मानं बध्नाति, मोचयति च, यत्र सूक्ष्मशरीरं तन्मात्रकं, त्रिविधकरणोपेतं तत् त्रिविधेन बन्धेन बध्यते। उक्तञ्च—

'प्राकृतेन च बन्धन, तथा वैकारिकेण च।
दक्षिणेन तृतीयेन बद्धो नान्येन मुच्यते'॥
तत् सूक्ष्मं धर्माऽधर्मसंयुक्तम् । ६२ ॥

भाष्यानु०—"पुरुष मुक्त है, पुरुष संसारी" ऐसा व्यवहार कैसे होगा ?[१] तस्मात् उसी कारण से पुरुष न बध्यते० न बंधता है, न मुक्त होता है, न संसरण करता है। क्योंकि प्रकृति ही नाना आश्रयोंवाली होकर अर्थात् दैव, मनुष्य और तिर्यक् योनियों का आश्रय लेकर बुद्धि, अहंकार, तन्मात्र, इन्द्रिय और महाभूत स्वरूप से बद्ध होती है, मुक्त होती है और संसार में आवागमन करती है। अब स्वभाव से ही मुक्त और सर्वगत (सर्वत्र व्याप्त) वह पुरुष कैसे संसरण करता है ? (उत्तर—)[२] अप्राप्तप्रापण के लिए उसका संसरण होता है इसलिए 'पुरुष बद्ध होता है, पुरुष मुक्त होता है, पुरुष संसरण करता है' ऐसा व्यवहार होता है, जिससे पुरुष की संसारिता प्रतीत होती है। सत्त्व-पुरुषान्तर ज्ञान से (अर्थात् बुद्ध्यादि से अतिरिक्त पुरुष है, ऐसा ज्ञान हो जाने पर) पुरुष की वास्तविकता अभिव्यक्त होती है जिससे केवल शुद्ध, मुक्त, स्वरूप-मात्र में प्रतिष्ठित पुरुष है; ऐसा बोध होता है। (प्रश्न) तब तो जब पुरुष का बन्ध ही नहीं होता तो मोक्ष भी नहीं होगा ? (उत्तर—) इस पर कहते हैं—प्रकृति ही पुरुष को बद्ध और मुक्त करती है[३] (प्रश्न—) प्रकृति के संसर्ग से कहाँ

---

१. अर्थात् पुरुष यदि अगुण और अपरिणामी है तो उसे सुख-दुःखादि रूप बन्धन कैसे होगा ? जब बन्धन ही नहीं हुआ तो उसका मोक्ष कैसे संभव है ? क्योंकि जिसका बन्धन होगा उसी का मोक्ष हो सकता है, फिर ६० वीं कारिकामें "पुरुषस्य विमोक्षार्थं" जो कहा था वह कैसे चरितार्थ होगा ? इस शंका का समाधान करते हुए उपसंहार कहते हैं।

२. अर्थात् निःसङ्ग होने से अप्राप्त जो शब्दादि उपभोग, उसकी प्राप्ति के लिए बुद्धि आदि से भेद होने पर भी तद्गत संसरण आत्मा में प्रतीत होता है। बुद्धि आदि के बन्धन से आत्मा में आरोप किया जाता है।

३. आत्मा अकेला होने पर भी प्रकृति के संसर्ग से अभेदाग्रहमूलक बन्धन का अपने में आरोप कर लेता है और मुक्ति का भी। जैसे जय-पराजय तो सेना के सिपाहियों की होती है किन्तु चूँकि वे सिपाही राजा के आश्रित हैं और उस हार या जीत से होने वाले शोक या हर्ष स्वामी (उस राजा) को भी होते हैं, इसलिए राजा ही हार गया या जीत गया ऐसा व्यवहार होता है। इसी प्रकार प्रकृतिगत

वह अपने को बद्ध या मुक्त समझता है ? (उत्तर—) जिस योनिविशेष में महदादि त्रिविध करणोंवाला तन्मात्रक सूक्ष्म शरीर त्रिविध बन्धन से बद्ध होता है (उसी में वह आत्मा अपने को बद्ध समझता है) । जैसा कि कहा है— "प्राकृत बन्ध से तथा वैकारिक बन्ध से और तीसरे दक्षिण बन्ध से बद्ध हुआ किसी अन्य से मुक्त नहीं हो सकता' वह सूक्ष्म शरीर धर्म-अधर्म से संयुक्त होता है ॥६२॥

[प्रकृति के बन्ध-मोक्ष में हेतु]

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ ६३ ॥

अन्वय—**प्रकृतिः, सप्तभिः, एव, रूपैः, आत्मना, आत्मानं, बध्नाति, सा, एव, च, एकरूपेण, पुरुषार्थं, प्रति, विमोचयति ।**

अर्थ—प्रकृति सात ही रूपों (धर्म, वैराग्य, ऐश्वर्य, अधर्म, अज्ञान, अवैराग्य और अनैश्वर्य) द्वारा अपने से ही अपने को बंधन में डालती है एक (ज्ञान) रूप से पुरुष के प्रयोजन के लिये मुक्त कर लेती है ।

भाष्यम्—'**प्रकृतिश्च बध्यते, प्रकृतिश्च मुच्यते, संसरती'ति कथम्** ? तदुच्यते—रूपैः सप्तभिरेव । **एतानि सप्त प्रोच्यन्ते—धर्मो, वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यम् । एतानि प्रकृतेः सप्त रूपाणि ।** तैरात्मानं = स्व बध्नाति **प्रकृतिः । आत्मना = स्वेनैव । सैव प्रकृतिः पुरुषस्यार्थः = पुरुषार्थः कर्त्तव्य' इति ।** विमोचयत्यात्मानमेकरूपेण = **ज्ञानेन ॥ ६३ ॥**

भाष्यानु०—(प्रश्न) प्रकृति बद्ध होती है, मुक्त होती है, संसरण करती है, कैसे ? (अर्थात् प्रकृतिगत बन्ध, संसार और अपवर्ग किन साधनों से होते हैं ?) (उत्तर—) वही कहा जाता है—रूपैः० सात रूपों से ही । ये सात कहे जाते हैं—धर्म, वैराग्य, ऐश्वर्य, अधर्म, अज्ञान, अवैराग्य, अनैश्वर्य, ये सात प्रकृति के रूप हैं । इससे आत्मानं = अपने को प्रकृति बाँध लेती है । आत्मना अपने से ही सैव वही प्रकृति—पुरुषार्थ० पुरुष का अर्थ (प्रयोजन—भोगापवर्ग रूप) करना चाहिये, इस प्रकार अपने को मुक्त कर लेती है। एक अवशिष्ट रूप अर्थात् ज्ञान से[1] ॥ ६३ ॥

भोग और अपवर्ग का विवेकाग्रह से पुरुष के साथ सम्बन्ध होने से पुरुष बद्ध है, पुरुष मुक्त है, ऐसा व्यवहार होता है ।

१. तात्पर्य यह है कि भोगरूप पुरुषार्थ के प्रति धर्मादि सात भावों से अपने को बाँध लेती है और अपवर्गरूप पुरुषार्थ के प्रति केवल एक ज्ञानभाव से अपने को

[तत्त्वाभ्यास से ज्ञानोदय]

एवं तत्त्वाभ्यासान्नाऽस्मि, न मे, नाऽहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ।। ६४ ।।

अन्वय—**एवं तत्त्वाभ्यासात्, नास्मि, न मे, न अहम्, इति, अपरिशेषम्, अविपर्ययाद्, विशुद्धम्, केवलं, ज्ञानम्, उत्पद्यते ।**

अर्थ—इस प्रकार (२५) तत्त्वों के अभ्यास से मैं कर्ता नहीं हूँ, यह मेरा (भोग्य शरीर) नहीं हैं मैं (भोक्ता) नहीं हूँ, ऐसा निःसन्देहात्मक और मिथ्याज्ञान से रहित कैवल्य ज्ञान (केवल पुरुषमात्र का ज्ञान) उत्पन्न होता है ।

भाष्यम्—**कथं तज्ज्ञानमुत्पद्यते ? । एवमुक्तेन क्रमेण पञ्चविंशतितत्त्वालोचनाभ्यासात् ' इयं प्रकृतिः, अयं पुरुषः, एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानी'ति पुरुषस्य ज्ञानमुत्पद्यते : नास्मि = नाहमेव भवामि । न–मे = मम शरीरं तत्, यतोऽहमन्यः, शरीरमन्यत् ।** नाहमित्यपरिशेषम्, **अहङ्काररहितम्** । अविपर्ययाद्विशुद्धम् । **विपर्ययः = संशयोऽविपर्ययादसंशयाद्विशुद्धं = केवलं, तदेवनान्यदस्तीति मोक्षकारणमुत्पद्यते = अभिव्यज्यते, ज्ञानं = पञ्चविंशतितत्त्वज्ञानं पुरुषस्येति ।।६४।।**

भाष्यानु०—(प्रश्न) वह ज्ञान कैसे उत्पन्न होता है ? (उत्तर) एवं पूर्वोक्त प्रकार से २५ तत्त्वों के आलोचन रूप अभ्यास से अर्थात् यह-प्रकृति है, यह पुरुष है, ये पंचतन्मात्रा इन्द्रिय और महाभूत हैं, ऐसा पुरुष को ज्ञान उत्पन्न होता है । नास्मि में कर्त्ता नहीं हूँ, न मे यह मेरा भोग्य शरीर नहीं है । क्यों कि मैं भिन्न हूँ और शरीर भिन्न है[1] नाहम् मैं (अहङ्कार विशिष्ट) भोक्ता नहीं हूँ । इत्यपरिशेषम् इस प्रकार का अपरिशेष अर्थात् संशय अन्तिम अहङ्कार रहित अविपर्ययाद्विशुद्ध विपर्यय = संशय, अविपर्यय से अर्थात् असंशय से, विशुद्ध मिथ्याज्ञान रूप मल से रहित) केवल (= पुरुषमात्र गोचर) 'वह पुरुष ही केवल है । अन्य कुछ नहीं' ऐसा मोक्ष का कारणभूत ज्ञानं = पञ्चविंशति तत्त्वात्मक ज्ञान पुरुष को उत्पद्यते अभिव्यक्त होता है ।। ६४ ।।

संसार से मुक्त कर लेती है । इससे यह भी सूचित होता है कि वैराग्यादि के अभाव में भी केवल ज्ञान से मुक्ति संभव है ।

१. अभेद ज्ञानपर्यन्त ही मैं और मेरा शरीर ऐसी प्रतीति होती है, भेदज्ञान होने पर तो वह प्रतीति नष्ट हो जाती है ।

[ज्ञान से वास्तविक स्वरूपदर्शन]

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ।। ६५ ।।

अन्वय—**तेन, प्रेक्षकवदस्थितः, स्वस्थः, पुरुषः, निवृत्तप्रसवाम्, अर्थवशात्, सप्तरूपविनिवृत्ताम्, प्रकृतिं, पश्यति ।**

अर्थ—उस तत्त्वज्ञान के कारण रङ्गमञ्च के दर्शक की भाँति स्थित और आत्ममात्र निष्ठ पुरुष, जिसका प्रयोजन सिद्ध हो गया है और जो प्रयोजनवशात् धर्मादि सात भावों से निवृत्त हो चुकी है ऐसी प्रकृति को देखता है ।

भाष्यम्—**ज्ञाने पुरुषः किं करोति ? तेन = विशुद्धेन केवलज्ञानेन,** पुरुषः प्रकृतिं पश्यति, प्रेक्षकवत् **प्रेक्षकेण तुल्यम्** । अवस्थितः स्वस्थः । यथा रङ्ग-**प्रेक्षकोऽवस्थितो नर्तकीं पश्यति, स्वस्थः-स्वस्मिंस्तिष्ठति** स्वस्थ = **स्वस्थानस्थितः । कथंभूतां प्रकृतिम्** ? निवृत्त प्रसवां = **निवृत्तबुद्ध्यहङ्कारकार्याम् ।** अर्थवशात् सप्तरूपविनिवृत्तां, **निर्वर्त्तितपुरुषोभयप्रयोजनवशाद्, यैः सप्तभीरूपैर्धर्मादिभि-रात्मानं बध्नाति, तेभ्यः** सप्तभ्यो रूपेभ्यो विनिवृत्तां **प्रकृतिं प्रश्यति ।। ६५ ।।**

भाष्यानु०—(प्रश्न) ज्ञान होने पर पुरुष क्या करता है ? (उत्तर) उस विशुद्ध केवल ज्ञान से पुरुष० जैसे नाटक देखनेवाला सभासद नर्तकी को देखता है ऐसे ही पुरुष एक दर्शक की तरह प्रकृति को देखता है । स्वस्थ का अर्थ है (स्वमिन् तिष्ठति इस विग्रह के अनुसार) अपने स्थान पर ही स्थित हुआ । (प्रश्न)–कैसी प्रकृति को देखता हैं ? (उत्तर)–निवृत्तप्रसवा बुद्धि और अहङ्कार के कार्यों से निवृत्त हुई[1] अथ० पुरुष के भोगापवर्गरूप प्रयोजन संपादित कर देने से जिन धर्माधर्मादि सात रूपों से अपने को बाँध लेती है उन सात रूपों से विनिवृत्त हुई प्रकृति को वह देखता है ।।६५।।'

(प्रश्न—प्रकृति-पुरुष के संयोग से ही सर्गोत्पत्ति होती है । प्रकृति का जड़स्वरूप भोग्यत्वयोग्यता तथा पुरुष का चेतनत्वरूप भोक्तृत्वयोग्यता ही इनका संयोग है । इस संयोग की निवृत्ति नहीं हो सकती क्योंकि इनका जड़त्व और चेतनत्व निवृत्त नहीं होता हैं प्रकृति-पुरुष दोनों नित्य हैं अतः उनका संयोग

---

१. तात्पर्य यह है कि भोग और विवेक साक्षात्कार, ये दो कार्य ही प्रकृति को उत्पन्न करने हैं, ये दोनों जब उत्पन्न कर लिए तो अब शेष कुछ रह ही नहीं जाता जिसे वह उत्पन्न करे । अतः निवृत्तप्रसवां कहा है ।

भी नित्य होगा तब सर्गोत्पत्ति भी अश्वयंभाविनी होगी। तब यह कैसे कहा कि 'निवृत्तप्रसवा प्रकृति को पुरुष देखता है' ? इस प्रश्न का उत्तर इस कारिका से देते हैं—)

[प्रकृतिसाक्षात्कार से सर्गनिवृत्ति]

[1]रङ्गस्थ इत्युपेक्षक एको, दृष्टाऽहमित्युपरमत्येका।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य॥ ६६॥

अन्वय—रङ्गस्थः इति, उपेक्षकः एकः, दृष्टा, अहम्, इति, एका, उपरमति, तयोः संयोगे, सत्यपि, प्रयोजनम्, नास्ति।

अर्थ—(मैं तो) "रङ्गमञ्च पर स्थित (दर्शक) की भाँति हूँ" ऐसा सोचकर एक (पुरुष) उपेक्षा (प्रकृति की) कर देता है। "मैं इस (पुरुष) के द्वारा देखी जा चुकी" यह सोचकर प्रकृति शान्त हो जाती है। इसके बाद उन दोनों का संयोग होने पर भी कोई प्रयोजन नहीं रह जाता।

भाष्यम्—रङ्गस्थ इति। **यथा रङ्गस्थ इत्येवमुपेक्षकः,** एकः = **केवलः** शुद्धः पुरुषस्तेनाहं दृष्टेति कृत्वा उपरता = निवृत्ता एका = एकैव प्रकृतिः, त्रैलोक्यस्यापि प्रधानकारणभूता न द्वितीया प्रकृतिरस्ति, मूर्तिवद्ये जातिभेदात्। एवं प्रकृतिपुरुषयोर्निवृत्तावपि व्यापकत्वात् संयोगोऽस्ति, न तु संयोगात् कृतः सर्गो भवति सति संयोगेऽपि तयोः = प्रकृतिपुरुषयोः सर्वगत्वात् सत्यपि संयोगे, प्रयोजनं नास्ति सर्गस्य—सृष्टेः चरितार्थत्वात्। प्रकृतेर्द्विविधं प्रयोजनं शब्दविषयोपलब्धिर्गुणपुरुषान्तरोपलब्धिश्च। उभयत्रापि चरितार्थत्वात्—सर्गस्य नास्ति प्रयोजनं येन पुनः सर्ग इति। यथा दानग्रहणनिमित्ते--उत्तमर्णाधमर्णयोर्द्रव्यविशुद्धौ सत्यपि संयोगे न कश्चिदर्थसम्बन्धो भवति। एवं प्रकृतिपुरुषयोरपि नास्ति प्रयोजनमिति॥ ६६॥

भाष्यानु०—नाटचशाला में स्थित पुरुष की तरह केवल शुद्ध पुरुष उसकी उपेक्षा करता है।[2] दृष्टाह० उस पुरुष से मैं देखी गई हूँ, यह

---

१. 'दृष्टा मयेत्युपेक्षक एको, दृष्टाहमित्युपरमत्यन्या" यही पाठ प्रायः सभी पुस्तकों तथा टीकाकारों में प्रचलित है।

२. अर्थात् रङ्गभूमि में स्थित सभासद जैसे नर्तकी को एक बार देखकर पुनः "मैं तो इसे देख चुका" यह कहकर उसकी उपेक्षा कर देता है, उसी प्रकार पुरुष भी "यह प्रकृति मुझ से भिन्न है, इसके सम्पर्क से मैं बँध जाता हूँ और इसे मैं

जानकर प्रकृति निवृत्त होती है। एक अर्थात् एकमात्र प्रकृति। क्योंकि तीनों लोकों की प्रधान कारणभूत एक ही प्रकृति है दूसरी नहीं। आकृति हनन में भेद होने से[1]। इसलिए प्रकृति और पुरुष के निवृत्त हो जाने पर भी संयोग तो होता ही है क्योंकि दोनों नित्य और व्यापक हैं किन्तु उस संयोग से सर्ग नहीं होता। (इसी को कारिका में स्पष्ट करते हैं—) सति० प्रकृति और पुरुष के व्यापक होने से संयोग होने पर भी, प्रयो० सृष्टि का कोई प्रयोजन नहीं रह जाता। क्योंकि सृष्टि चरितार्थ हो चुकी। (इसी चरितार्थता को स्पष्ट करते हैं—) प्रकृति के दो प्रकार के प्रयोजन हैं—शब्दादिविषयोपलब्धि (भोग) और गुणपुरुषान्तरोपलब्धि (अपवर्ग)। ये दोनों जब हो गये तब सर्ग की आवश्यकता ही क्या रह जाती है। (संयोग होता है तो सर्ग भी होना चाहिये?) जैसे देने-लेने के लिए उत्तमर्ण (साहूकार) और अधमर्ण (ऋणी) दोनों मिलते हैं द्रव्य का लेन-देन हो जानेपर फिर यदि वे मिलें भी तो कोई अर्थसम्बन्ध उनका नहीं रह जाता। इसी प्रकार प्रकृति पुरुष भी मिलते हैं, पर सर्ग-सम्बन्ध नहीं होता॥ ६६॥

[सम्यग्ज्ञान से जीवन्मुक्ति]

सम्यग् ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः॥ ६७॥

अन्वय—**सम्यग्ज्ञानाधिगमात्, धर्मादीनाम्, अकारणप्राप्तौ, संस्कारवशात्, चक्रभ्रमवत्, धृतशरीरः, तिष्ठति।**

अर्थ—अच्छी प्रकार ज्ञान उत्पन्न हो जाने से धर्म आदि (सात भावों) के असमर्थ होने पर संस्कारवशात् चाक के घुमाव की तरह योगी शरीर को धारण किये रहता है।

जान गया" यह समझकर उसकी उपेक्षा कर देता है अर्थात् उसके भोगादि **आवेश** से रहित हो जाता है।

१. प्रकृति एक ही है द्वितीय नहीं। इसमें हेतु है "मूर्तिवधे जातिभेदात्" **अर्थात्** प्रकृति का जात्या भेद स्वीकार करने पर मूर्तिनाश हेतु होता है जो **परिणामवाद** में असम्भव है।

भाष्यम्—यदि पुरुषस्योत्पन्ने ज्ञाने मोक्षो भवति, ततो मम कस्मान्न भवतीत्यत उच्यते। यद्यपि पञ्चविंशतितत्त्वज्ञानं भवति, तथापि संस्कारवशाद्धृतशरीरो योगी तिष्ठति। कथम्? चक्रभ्रमवत् = चक्रभ्रमेण तुल्यम्। यथा कुलालश्चक्रं भ्रमयित्वा घटं करोति मृत्पिण्डं चक्रमारोप्य, पुनः कृत्वा घटं पर्यमुञ्चति चक्रं भ्रमत्येव, संस्कारवशात्, एवं–सम्यग्ज्ञानाधिगमात्–उत्पन्नसम्यग्ज्ञानस्य धर्मादीनामकारणप्राप्तौ। एतानि सप्तरूपाणि बन्धनभूतानि सम्यग्ज्ञानेन दग्धानि। यथा नाग्निना दग्धानि बीजानि प्ररोहणसमर्थानि, एवमेतानि धर्मादीनि बन्धनानि न समर्थानि। धर्मादीनामकारणप्राप्तौ संस्कारवशाद्धृतशरीरस्तिष्ठति ज्ञानाद्वर्त्तमानधर्माऽधर्मक्षयः कस्मान्न भवति? वर्तमानत्वादेव क्षणान्तरे क्षयमत्येति। ज्ञानं त्वनागतं कर्म दहति, वर्त्तमान शरीरेण च यत् करोति तदपीति, विहितानुष्ठानकरणादिति, संस्कारक्षयाच्छरीरपाते मोक्षः॥ ६७॥

भाष्यानु०—यदि पुरुष को ज्ञान उत्पन्न होनेपर मोक्ष हो जाता है तो हमको भी ज्ञान होनेपर मोक्ष क्यों नहीं हो जाता? (अर्थात् ज्ञान होनेपर आत्मा का मोक्ष होता है तो शरीर का भी मोक्ष हो जाना चाहिए?) इसपर कहते हैं—यद्यपि २५ तत्त्वों का ज्ञान हो जाता है तथापि संस्कारदशात् योगी शरीर धारण किये रहता है, शरीर का मोक्ष नहीं होता। कैसे? चक्र० चक्रभ्रम के समान। जैसे–कुलाल चाक घुमाकर घड़ा बनाता है। मिट्टी का पिण्ड उसपर रखता है, चाक घूमता जाता है वह मिट्टी को घड़े के आकार में सहलाता रहता है। घड़ा बन जाने पर उसे तो उतार लेता है किन्तु चाक फ़िर भी घूमता ही रहता है। क्योंकि, उसके घूमने का संस्कार अभी बना है। इसी प्रकार सम्यग्० अच्छी प्रकार ज्ञान उत्पन्न हो जाने से **धर्मा०** ज्ञान को छोड़कर धर्माधर्मादि सात भाव, जोकि बन्धनभूत थे, सम्यक् ज्ञान से दग्ध हो जाते हैं। जैसे अग्नि से जलाये हुए बीज उगने में असमर्थ होते हैं ऐसे ही ये धर्मादि भी फिर बन्धन में असमर्थ हो जाते हैं। चूंकि अब ये धर्मादि निष्प्रयोजन होते हैं इसलिए केवल संस्कारवशात् योगी शरीर धारण किये रहता है। (प्रश्न–) ज्ञान से वर्तमान धर्माधर्मादि का क्षय क्यों नहीं होता? (उत्तर–) **क्योंकि वे** कर्म वर्तमान होते हैं (अर्थात् उसी शरीर से तत्काल किये जाते हैं) **प्रारब्ध का**

नाश होनेपर तो उनका भी नाश हो जाता है। ज्ञात तो आगे किये जानेवाले कर्मों का नाश करता है, वर्तमान शरीर से जो कर्म किये जाते हैं वे तो प्रारब्ध के अनुसार होते हैं और प्रारब्ध कर्मों का भोग किये बिना क्षय नहीं होता, भोग विना शरीर के नहीं किया जा सकता। इसलिए इसी शरीर से वह सम्पूर्ण प्रारब्धों का नाश कर लेता है। ज्ञान हो जानेसे वह अविहित कर्म नहीं करता इसलिये आगे शरीर-धारण की संभावना नहीं रह जाती। संस्कारों का क्षय होने पर शरीर का भी मोक्ष हो जाता हैं॥ ६७॥

[प्रधान के निवृत्त होनेपर पुरुष को कैवल्यप्राप्ति]

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति॥ ६८॥

अन्वय—शरीरभेदे, प्राप्ते, चरितार्थत्वात्, प्रधानविनिवृत्तौ, (पुरुषः) ऐकान्तिकम्, आत्यन्तिकम्, उभयं. कैवल्यम्, आप्नोति।

अर्थ—शरीरान्तर प्राप्त करनेपर भी प्रयोजन सिद्ध होनेके कारण प्रधानके निवृत्त हो जाने पर पुरुष ऐकान्तिक (अवश्य होने वाले) और आत्यन्तिक =स्थायी (सदा रहनेवाले) दोनों प्रकारके कैवल्य को प्राप्त होता है॥ ६८॥

भाष्यम्—स किंविशिष्टो भवतीत्युच्यते। धर्माऽधर्मजनितसंस्कारक्षयात् प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानस्य विनिवृत्तौ ऐकान्तिकम् = अवश्यम्, आत्यन्तिकम् = अन्तरहितं, कैवल्यम् = केवलभावान्मोक्षः। उभयम् = ऐकान्तिकात्यन्तिकमित्येवं विशिष्टं कैवल्यमाप्नोति॥ ६८॥

भाष्यानु०—(प्रश्न) उसकी क्या विशेषता होती है? (उत्तर) धर्माधर्म-जनित संस्कारों का क्षय होने से प्राप्ते० शरीरान्तर प्राप्त करनेपर भी प्रधानके निवृत्त होनेपर (क्योंकि वह चरितार्थ हो चुका है, उसने अपना कार्य कर लिया अतः वह पुरुष) ऐकान्तिक = अवश्य, आत्यन्तिक = अन्त रहित कैवल्य = केवल भाव अर्थात् मोक्षको उभयम् = ऐकान्तिक और आत्यन्तिक इस विशेषता

से युक्त कैवल्यको प्राप्त होता है[1] ॥ ६८ ॥

[फलस्तुति]

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ ६९ ॥

अन्वय—**इदं, गुह्यं, पुरुषार्थज्ञानम्, परमर्षिणा, समाख्यातम्, यत्र, भूतानां, स्थित्युत्पत्तिप्रलयाः, चिन्त्यन्ते ।**

अर्थ—यह गोपनीय (रहस्य रूप) पुरुषार्थज्ञान महर्षि (कपिल) द्वारा अच्छी प्रकार कहा गया है । जिसमें प्रकृति के विकार भूत पदार्थों की स्थिति, उत्पत्ति और प्रलयका विचार किया गया है ॥ ६९ ॥

भाष्यम्—पुरुषार्थः = **मोक्षस्तदर्थं** ज्ञानमिदं, गुह्यं = **रहस्यं**, परमर्षिण = **श्रीकपिलर्षिणा** समाख्यातं = **सम्यगुक्तम्**, यत्र ज्ञाने भूतानां = **वैकारिकारिकाणां**, स्थित्युत्पत्तिप्रलयाः = **अवस्थानाऽऽविर्भावतिरोभावाः**, चिन्त्यन्ते = **विचार्यन्ते, येषां विचारात् सम्यक् पञ्चविंशतितत्त्वविवेचनात्मिका सम्पद्यते संवित्तिरिति** ॥ ६९ ॥

भाष्यानु०—पुरुषार्थ० पुरुषार्थ अर्थात् मोक्ष की प्राप्ति के निमित्त यह रहस्यपूर्ण ज्ञान (सांख्यशास्त्ररूप २५ तत्त्वों का विवेचन) श्री कपिलऋषि ने अच्छी प्रकार कहा है । यत्र० जिस (सांख्यरूप) ज्ञान में प्रकृतिविकारभूत जो पदार्थ हैं उनके स्थिति, आविर्भाव (उत्पन्न होना) तथा तिरोभाव (नाश हो जाना) विचार किये जाते हैं । जिनके विचारसे अच्छी प्रकार २५ तत्त्वोंका विवेचन रूप संवित्ति अर्थात् प्रकृतिपुरुषविवेकका साक्षात्कारात्मक अनुभव हो जाता है ॥ ६९ ॥

साङ्ख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि ।
तत्रेताः सप्ततिरार्याः भाष्यं चात्र गौडपादकृतम् ॥ १ ॥

---

१. तात्पर्य यह है कि भोग से प्रारब्धकर्मोंका नाश होनेपर बुद्धि आदि द्वारा जिसने भोग और अपवर्ग रूप कार्य किया है ऐसी प्रकृतिके ज्ञानी आत्मा से निवृत्त हो जानेपर, अवश्य होनेवाले तथा जिसमें फिर दूसरा दुःख उत्पन्न नहीं होता ऐसे दो प्रकार के कैवल्य = मोक्षको आत्मा प्राप्त करता है ।

"कपिलमुनि ने संसारकी विमुक्तिका कारणभूत सांख्यशास्त्र कहा था, जिसमें ये ७० कारिकाएं हैं और इनपर यह श्रीगौड़पादकृत भाष्य समाप्त होता है ॥"

एतत्पवित्रमग्र्यं मुनिरासुयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय, तेन च बहुधा कृतं तन्त्रम् ॥ ७० ॥

अन्वय—एतत्, पवित्रम्, अग्र्यं, मुनिः, अनुकम्पया, आसुरये, प्रददौ, आसुरिः, अपि, पंचशिखाय, तेन, च, तन्त्रं बहुधाकृतम् ।

अर्थ—इस परमपवित्र, सर्वश्रेष्ठ ज्ञानको भगवान् कपिलमुनिने कृपापूर्वक सर्व प्रथम आसुरि मुनिको दिया और आसुरिने भी अपने शिष्य पंचशिखाचार्यको दिया तथा उन्होंने इस शास्त्र की व्याख्या करके संसार में फैलाया ॥७०॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ ७१ ॥

अन्वय—शिष्यपरंपरया आगतम्, एतत्, सिद्धान्तम्, सम्यग्विज्ञाय, आर्यमतिना, ईश्वरकृष्णेन, आर्याभिः, संक्षिप्तम् ।

अर्थ—शिष्यपरम्परा से प्राप्त इस सांख्यशास्त्रज्ञान को श्रेष्ठबुद्धि वाले ईश्वरकृष्ण ने अच्छी प्रकार सिद्धान्त को समझकर संक्षेप करके आर्या छन्दों में निबद्ध किया है ॥ ७१ ॥

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः, परवादविवर्जिताश्चापि ॥ ७२ ॥

❀इति श्रीमदीश्वरकृष्णकृताः सांख्यकारिकाः ।❀

अर्थ—इन सत्तर कारिकाओं में जिन अर्थों का प्रतिपादन किया गया है वे ही अर्थ सम्पूर्ण*षष्टितन्त्र के हैं। (कलेवर बढ़ाने के लिये) आख्यायि-

---

*षष्टितन्त्र—"षष्टि पदार्थाः तन्यन्ते यस्मिन् शास्त्रे तत् षष्टितन्त्रम्" माठर के इस कथन के आधार पर षष्टितन्त्र सांख्यशास्त्र का ही पर्याय सिद्ध होता है। तत्त्वकौमुदीकार वाचस्पति मिश्र तथा चन्द्रिकाकार नारायण तीर्थ का

काए नहीं दी गई हैं और दूसरों के सिद्धान्तों का खण्डन-मण्डन भी छोड़ दिया गया है। [केवल सांख्याशास्त्र के सिद्धान्त सम्पूर्ण और संक्षिप्त मूलभूत दे दिये गये हैं] ॥ ७२ ॥

—:-०-:—

भी यही मत है। आधुनिक कई विद्वानों का कथन है कि पंचशिखाचार्य ने एक विशाल ग्रन्थ रचा था जिसमें ६० प्रकरण थे। ३२ प्रकरण पूर्ण प्राकृतमण्डल में थे जो तन्त्र कहे जाते थे तथा २८ प्रकरण उत्तर वैकृतमण्डल में थे जो काण्ड कहलाते थे। चीनी परम्परा कहती है कि ६०००० श्लोक होने के कारण इसे षष्टितन्त्र कहा जाता था। श्री उदयवीर शास्त्री ने अपने सांख्यदर्शन का इतिहास (द्वितीय प्रकरण) में प्रबलप्रमाणों से सिद्ध किया है कि कपिलप्रणीत सांख्य-षडध्यायी ही षष्टितन्त्र है। इसमें जिन ६० पदार्थों का वर्णन है वे हैं—१० मौलिक पदार्थ, ५ विपर्यय, ९ तुष्टि, ८ सिद्धि तथा २८ अशक्तियाँ। इनमें ५० प्रत्यय सर्गों को सबने स्वीकार किया है किन्तु १० मौलिक अर्थों में मतभेद है। नारायण तीर्थ ने सांख्य सम्मत २५ तत्त्वों को ही १० मौलिक अर्थ माना है किन्तु अन्य आचार्यों ने—एकत्व, अर्थवत्त्व, पारार्थ्य, अन्यत्व, अकर्तृत्व, बहुत्व, अस्तित्व, वियोग, योग और स्थिति ये १० माने हैं।

कारिकाणामकाराद्यनुक्रमणी